# तैत्तिरीयब्राह्मणम्
## द्वितीयाष्टके आदितः पञ्च प्रश्नाः

Date          Page No.

# तैत्तिरीयब्राह्मणम्

## द्वितीयाष्टके आदितः पञ्च प्रश्नाः

| | | |
|---|---|---|
| प्रथमः प्रश्नः | 1 - 13 | 60 |
| द्वितीयः प्रश्नः | 14 - 29 | 73 |
| तृतीयः प्रश्नः | 30 - 41 | 50 |
| चतुर्थः प्रश्नः | 41 - 59 | 80 |
| पञ्चमः प्रश्नः | 60 - 71 | 45 |

श्रीः

द्वितीयाष्टके प्रथमः प्रश्नः

ओम्। अङ्गिरसो वै सत्त्रमासत। तेषां पृश्निर्घर्मधुगासीत्। सर्जी
षेणाजीवन्। तेऽब्रुवन्। कस्मै नु सत्त्रमास्महे। येऽस्या ओषधीर्जनयाम
इति। ते दिवो वृष्टिमसृजन्त। यावन्तः स्तोका अवापद्यन्त। तावतीरोषधयो
जायन्त। ता जाताः पितरो विषेणालिम्पन्। (1) तासां जग्ध्वा रुप्यन्त्यैत्।
तेऽब्रुवन्। क इदमित्थमकरिति। वयं भागधेयमिच्छमाना इति पितरोऽब्रुवन्।
किं वो भागधेयमिति। अग्निहोत्र एव नोऽप्यस्त्वित्यब्रुवन्। तेभ्य एतद्भाग
धेयं प्रायच्छन्। यद्धुत्वा निमार्ष्टि। ततो वै त ओषधीरस्वदयन्। य एवं
वेद। (2) स्वदन्तेऽस्मा ओषधयः। ते वत्समुपावासृजन्। इदं नो हव्यं
प्रदापयेति। सोऽब्रवीद्वरं वृणै। दश मा रात्रीर्जातं न दोहन्। आ संगवं मात्रा
सह चराणीति। तस्माद्वत्सं जातं दश रात्रीर्न दुहन्ति। आ संगवं मात्रा सह
चरति। वारेवृतं ह्यस्य। तस्माद्वत्सं संसृष्टधयं रुद्रो घातुकः।
अति हि सन्धां धयति। (3)।

प्रजापतिरग्निमसृजत। तं प्रजा अन्वसृज्यन्त। तमभाग उपास्त। सोऽस्य
प्रजाभिरपाक्रामत्। तमवरुरुत्समानोऽन्वैत्। तमवरुधं नाशक्नोत्। स
तपोऽतप्यत। सोऽग्निरुपारमतातापि वै स्य प्रजापतिरिति। स रराटादुद
मृष्ट (4) तद्घृतमभवत्। तस्माद्यस्य दक्षिणतः केशा उन्मृष्टाः।
तां ज्येष्ठलक्ष्मी प्राजापत्येत्याहुः। यद्रराटादुदमृष्ट। तस्माद्रराटे

P.No.

केशा न सन्ति। तदग्नौ प्रागृह्णात्। तदव्यचिकित्सत्। जुहवानी३
मा हौषा३मिति। तद्विचिकित्सायै जन्म। य एवं विद्वान् विचिकित्सति। (5)
वसीय एव चेतयते। तं वागभ्यवदज्जुहुधीति। सोऽब्रवीत्। कस्त्वमसीति।
स्वैव ते वागित्यब्रवीत्। सोऽजुहोत्स्वाहेति। तत्स्वाहाकारस्य जन्म। य
एवꣳ स्वाहाकारस्य जन्म वेद। करोति स्वाहाकारेण वीर्यम्। यस्यैवं
विदुषस्स्वाहाकारेण जुह्वति। (6) भोगायैवास्य हुतं भवति। तस्या आहु
त्यै पुरुषमसृजत। द्वितीयमजुहोत्। सोऽश्वमसृजत। तृतीयमजुहोत्। स
गामसृजत। चतुर्थमजुहोत्। सोऽविमसृजत। पंचममजुहोत्। सोऽजाम
सृजत। (7) सोऽग्निरबिभेत्। आहुतीभिर्वै माऽऽप्नोतीति। स प्रजापतिं पुनः
प्राविशत्। तं प्रजापतिरब्रवीत्। जायस्वेति। सोऽब्रवीत्। किं भागधेयमभि
जनिष्य इति। तुभ्यमेवेदꣳ हूयाता इत्यब्रवीत्। स एतद्भागधेयमभ्यजायत।
यदग्निहोत्रम्। (8) तस्मादग्निहोत्रमुच्यते। तद्धूयमानमादित्योऽब्रवीत्।
मा हौषीः। उभयोर्वै नावेतदिति। सोऽग्निरब्रवीत्। कथं नौ होष्यन्तीति।
सायमेव तुभ्यं जुहवन्। प्रातर्मह्यमित्यब्रवीत्। तस्मादग्नये सायꣳ हूयते।
सूर्याय प्रातः। (9) आग्नेयी वै रात्रिः। ऐन्द्रमहः। यदनुदिते सूर्ये प्रातर्जुहु
यात्। उभयमेवाग्नेयꣳ स्यात्। उदिते सूर्ये प्रातर्जुहोति। तथाऽग्नये सायꣳ
हूयते। सूर्याय प्रातः। रात्रिं वा अनु प्रजाः प्रजायन्ते। अह्ना प्रतितिष्ठन्ति।
यत्सायं जुहोति। (10) प्रैव तेन जायते। उदिते सूर्ये प्रातर्जुहोति। प्रत्येव तेन

P.No.

तिष्ठति। प्रजापतिरकामयत प्रजायेयेति। स एतदग्निहोत्रं मिथुनमपश्यत्।
तदुदिते सूर्येऽजुहोत्। यजुषाऽन्यत्। तूष्णीमन्यत्। ततो वै स प्राजायत।
यस्यैवं विदुष उदिते सूर्येऽग्निहोत्रं जुह्वति। (11) प्रैव जायते। अथो यथा दिवा
प्रजानन्नेति। तादृगेव तत्। अथो खल्वाहुः। यस्य वै द्वौ पुण्यौ गृहे वसतः।
यस्तयोरन्यतरं राधयत्यन्यं न। उभौ वाव स तावृच्छतीति। अग्निं वावादित्य
स्सायं प्रविशति। तस्मादग्निर्दूरान्नक्तं ददृशे। उभे हि तेजसी संपद्येते। (12)
उद्यन्तं वावादित्यमग्निरनुसमारोहति। तस्माद्धूम एवाग्नेर्दिवा ददृशे। यदग्नये
सायं जुहुयात्। आ सूर्याय वृश्च्येत। यत्सूर्याय प्रातर्जुहुयात्। आग्नये वृश्च्येत।
देवताभ्यस्समदं दध्यात्। अग्निर्ज्योतिर्ज्योतिस्सूर्यस्स्वाहेत्येव सायं होत
व्यम्। सूर्यो ज्योतिर्ज्योतिरग्निस्स्वाहेति प्रातः। तथोभाभ्यां सायं हूयते। (13)
उभाभ्यां प्रातः। न देवताभ्यस्समदं दधाति। अग्निर्ज्योतिरित्याह। अग्निर्वै रेतो
धाः। प्रजा ज्योतिरित्याह। प्रजा एवास्मै प्रजनयति। सूर्यो ज्योतिरित्याह। प्रजा
स्वेव प्रजातासु रेतो दधाति। ज्योतिरग्निस्स्वाहेत्याह। प्रजा एव प्रजाता अस्यां प्रति
ष्ठापयति। (14) तूष्णीमुत्तरामाहुतिं जुहोति। मिथुनत्वाय प्रजात्यै। यदुदिते सूर्ये प्रात
(या र्जुहुयात्। यथाऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति। तादृगेव तत्।
क्वाह ततस्तद्भवतीत्याहुः। यत्स न वेद। यस्मै तद्धरन्तीति। तस्माद्यदोषसं
जुहोति। तदेव संप्रति। अथो यथा प्रार्थमौषसं परिवेवेष्टि। तादृगेव तत्। (15) 2

P.No.

रुद्रो वा एषः। यदग्निः। पत्नी स्थाली। यन्मध्येऽग्नेरधिश्रयेत्। रुद्राय
पत्नीमपि दध्यात्। प्रमायुका स्यात्। उदीचोऽङ्गारान्निरूह्याधिश्रयति।
पत्नियै गोपीथाय। व्यन्तान्करोति। तथा पत्न्यप्रमायुका भवति। (16)
घर्मो वा एषोऽशान्तः। अहरहः प्रवृज्यते। यदग्निहोत्रम्। प्रतिषिञ्चेत्पशुकाम
स्याशान्तमिव हि पशव्यम्। न प्रतिषिञ्चेद्ब्रह्मवर्चसकामस्य। समिद्धमिव
हि ब्रह्मवर्चसम्। अथो खलु। प्रतिषिच्यमेव। यत्प्रतिषिञ्चति। (17) तत्पश
व्यम्। यज्जुहोति। तद्ब्रह्मवर्चसि। उभयमेवाकः। प्रच्युतं वा एतदस्मा
ल्लोकात्। अगतं देवलोकम्। यच्छृतग्ं हविरनभिघारितम्। अभिद्योतय
ति। अभ्येवैनद्धारयति। अथो देवत्रैवैनद्गमयति। (18) पर्यग्निकरोति।
रक्षसामपहत्यै। त्रिः पर्यग्निकरोति। त्र्यावृद्धि यज्ञः। अथो मेध्यत्वाय।
यत्प्राचीनमुद्वासयेत्। यजमानग्ं शुचार्पयेत्। यद्दक्षिणा। पितृदेवत्यग्ं
स्यात्। यत्प्रत्यक्। (19) पत्नीग्ं शुचार्पयेत्। उदीचीनमुद्वासयति। एषा वै
देवमनुष्याणाग्ं शान्ता दिक्। तामेवैनदनूद्वासयति शान्त्यै। वर्त्म करोति।
यज्ञस्य सन्तत्यै। निष्टपति। उपैव तत्स्तृणाति। चतुरुन्नयति। चतुष्पादः
पशवः। (20) पशूनेवावरुन्धे। सर्वान्पूर्णानुन्नयति। सर्वे हि पुण्या राद्धाः।
अनूच उन्नयति। प्रजाया अनूचीनत्वाय। अनूच्येवास्य प्रजार्धुका भवति।
संमृशति। व्यावृत्त्यै। नाहोष्यन्नुपसादयेत्। यद्धोष्यन्नुपसादयेत्। यथान्यस्मा
उपनिधाय। (21) अन्यस्मै प्रयच्छति। तादृगेव तत्। आस्मै वृश्च्येत।

P.No.

यदेव गार्हपत्येधिश्रयति । तेन गार्हपत्यं प्रीणाति । अग्निरबिभेत् । आहुतयो
मात्येष्यन्तीति । स एतागं समिधमपश्यत् । तामाधत्त । ततो वा अग्नावाहु
तयोध्रियन्त । (22) यदेनगं समयच्छत् । तत्समिधस्समित्त्वम् । समिध
मादधाति । समेवैनं यच्छति । आहुतीनां धृत्यै । अथो अग्निहोत्रमेवेध्म
वत्करोति । आहुतीनां प्रतिष्ठित्यै । ब्रह्मवादिनो वदन्ति । यदेकागं समिध
माधाय द्वे आहुती जुहोति । अथ कस्यागं समिधि द्वितीयामाहुतिं जुहो
तीति । (23) यद्द्वे समिधावादध्यात् । भ्रातृव्यमस्मै जनयेत् । एकागं समि
धमाधाय । यजुषान्यामाहुतिं जुहोति । उभे एव समिद्धती आहुती जुहोति ।
नास्मै भ्रातृव्यं जनयति । आदीप्तायां जुहोति । समिद्धमिव हि ब्रह्मवर्चसम् ।
अथो यथातिथिं ज्योतिष्कृत्वा परिवेवेष्टि । तादृगेव तत् । चतुरुन्नयति । द्विर्जु
होति । तस्माद्द्विपाच्चतुष्पादमत्ति । अथो द्विपद्येव चतुष्पदः प्रतिष्ठापयति । (24)
3

उत्तरावतीं वै देवा आहुतिमजुहवुः । अवाचीमसुराः । ततो देवा अभवन् ।
परासुराः । यं कामयेत वसीयान्त्स्यादिति । कनीयस्तस्य पूर्वगं हुत्वा । उत्तरं
भूयो जुहुयात् । एषा वा उत्तरावत्याहुतिः । तां देवा अजुहवुः । ततस्तेऽभवन् ।
(25) यस्यैवं जुह्वति । भवत्येव । यं कामयेत पापीयान्त्स्यादिति । भूयस्तस्य
पूर्वगं हुत्वा । उत्तरं कनीयो जुहुयात् । एषा वा अवाच्याहुतिः । तामसुरा अजुह
वुः । ततस्ते पराभवन् । यस्यैवं जुह्वति । परैव भवति । (26) हुत्वोपसा

P.No.

द्वयत्यजामित्वाय। अथो यावृत्त्यै। गार्हपत्यं प्रतीक्षते। अननुध्यायिनमेवैनं करोति। अग्निहोत्रस्य वै स्थाणुरस्ति। तं य ऋच्छेत्। यज्ञस्थाणुमृच्छेत्। एष वा अग्निहोत्रस्य स्थाणुः। यत्पूर्वाहुतिः। तां यदुत्तरयाभिजुहुयात्। (27) यज्ञस्थाणुमृच्छेत्। अतिहाय पूर्वामाहुतिं जुहोति। यज्ञस्थाणुमेव परिवृणक्ति। अथो भ्रातृव्यमेवात्यत्वातिक्रामति। अवाचीनꣳ सायमुपमार्ष्टि। रेत एव तद्दधाति। ऊर्ध्वं प्रातः। प्रजनयत्येव तत्। ब्रह्मवादिनो वदन्ति। चतुरुन्नयति। (28) द्विर्जुहोति। अथ क्व द्वे आहुती भवत इति। अग्नौ वैश्वानर इति ब्रूयात्। एष वा अग्निर्वैश्वानरः। यद्ब्राह्मणः। हुत्वा द्विः प्राश्नाति। अग्नावेव वैश्वानरे द्वे आहुती जुहोति। द्विर्जुहोति। द्विर्निमार्ष्टि। द्विः प्राश्नाति। (29) षट्संपद्यन्ते। षड्वा ऋतवः। ऋतूनेव प्रीणाति। ब्रह्मवादिनो वदन्ति। किं देवत्यमग्निहोत्रमिति। वैश्वदेवमिति ब्रूयात्। यद्यजुषा जुहोति। तदैन्द्राग्नम्। यत्तूष्णीम्। तत्प्राजापत्यम्। (30) यन्निमार्ष्टि। तदोषधीनाम्। यद्द्वितीयम्। तत्पितृणाम्। यत्प्राश्नाति। तद्गर्भिणाम्। तस्माद्गर्भा अनश्नन्तो वर्धन्ते। यदाचामति। तन्मनुष्याणाम्। उदङ्पर्यावृत्याचामति। (31) आत्मनो गोपीथाय। निर्णेनेक्ति शुद्ध्यै। निष्टपति स्वगाकृत्यै। उद्दिशति। सप्तर्षीनेव प्रीणाति। दक्षिणा पर्यावर्तते। स्वमेव वीर्यमनुपर्यावर्तते। तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरः। अथो आदित्यस्यैवावृतमनुपर्यावर्तते। हुत्वोपसमिन्धे। (32) ब्रह्मवर्चसस्य समिद्ध्यै। न बर्हिरनुप्रहरेत्। असꣳस्थितो

P.No.

वा एष यज्ञः । यदग्निहोत्रम् । यदनु प्रहरेत् । यज्ञं विच्छिन्द्यात् ।
तस्मान्नानुप्रहृत्यम् । यज्ञस्य सन्तत्यै । अपो निनयति । अवभृथ
स्यैव रूपमकः । (33) 4

ब्रह्मवादिनो वदन्ति । अग्निहोत्रप्रायणा यज्ञाः । किं प्रायणमग्निहोत्रमि
ति । वत्सो वा अग्निहोत्रस्य प्रायणम् । अग्निहोत्रं यज्ञानाम् । तस्य पृथि
वी सदः । अन्तरिक्षमाग्नीध्रम् । द्यौर्हविर्धानम् । दिव्या आपः प्रोक्षण
यः । ओषधयो बर्हिः । (34) वनस्पतय इध्मः । दिशः परिधयः । आदित्यो
यूपः । यजमानः पशुः । समुद्रोऽवभृथः । संवत्सरस्स्वगाकारः । तस्मादाहिता
ग्नेस्सर्वमेव बर्हिष्यं दत्तं भवति । यत्सायं जुहोति । रात्रिमेव तेन दक्षिण्यां
कुरुते । यत्प्रातः (35) अहरेव तेन दक्षिण्यं कुरुते । यत्ततो ददाति । सा दक्षि
णा । यावन्तो वै देवा अहुतमादन् । ते पराभवन् । त एतदग्निहोत्रं सर्व
स्यैव समवदायाजुहवुः । तस्मादाहुः । अग्निहोत्रं वै देवा गृहाणां निष्कृति
मपश्यन्निति । यत्सायं जुहोति । रात्रिया एव तद्धुताद्याय । (36) यजमानस्या
पराभावाय । यत्प्रातः । अह्न एव तद्धुताद्याय । यजमानस्यापराभावाय । यत्ततो
ऽश्नाति । हुतमेव तत् । द्वयोः पयसा जुहुयात्पशुकामस्य । एतद्वा अग्निहोत्रं
मिथुनम् । य एवं वेद । प्र प्रजया पशुभिर्मिथुनैर्जायते । (37) इमामेव पूर्वया
दुहे । अमूमुत्तरया । आधिश्रित्योत्तरमानयति । योनावेव तद्रेतस्सिञ्चति

P.No.

प्रजनने। आज्येन जुहुयात्तेजस्कामस्य। तेजो वा आज्यम्। तेजस्व्येव
भवति। पयसा पशुकामस्य। एतद्वै पशूनाग्ं रूपम्। रूपेणैवास्मै पशू
नवरुन्धे। (38) पशुमानेव भवति। दध्नेन्द्रियकामस्य। इन्द्रियं वै दधि।
इन्द्रियाव्येव भवति। यवाग्वा ग्रामकामस्यौषधा वै मनुष्याः। भागधेयेनैवास्मै
सजातानवरुन्धे। ग्राम्येव भवति। अयज्ञो वा एषः। योऽसामा। (39)
चतुरुन्नयति। चतुरक्षरग्ं रथन्तरम्। रथन्तरस्यैष वर्णः। उपरीव हरति।
अन्तरिक्षं वामदेव्यम्। वामदेव्यस्यैष वर्णः। द्विर्जुहोति। द्व्यक्षरं बृहत्।
बृहत एष वर्णः। अग्निहोत्रमेव तत्सामन्वत्करोति। (40) यो वा अग्निहो
त्रस्योपसदो वेद। उपैनमुपसदो नमन्ति। विन्दत उपसत्तारम्। उन्नीयोपसा
दयति। पृथिवीमेव प्रीणाति। होष्यन्नुपसादयति। अन्तरिक्षमेव प्रीणाति।
हुत्वोपसादयति। दिवमेव प्रीणाति। एता वा अग्निहोत्रस्योपसदः। (41)
य एवं वेद। उपैनमुपसदो नमन्ति। विन्दत उपसत्तारम्। यो वा अग्निहोत्रस्या
श्रावितं प्रत्याश्रावितग्ं होतारं ब्रह्माणं वषट्कारं वेद। तस्य त्वेव हुतम्। प्रा
णो वा अग्निहोत्रस्याश्रावितम्। अपानः प्रत्याश्रावितम्। मनो होता। चक्षु
र्ब्रह्मा। निमेषो वषट्कारः। (42) य एवं वेद। तस्य त्वेव हुतम्। सायं यावानश्च
वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो गृहमागच्छन्ति। तान् यन्न तर्पयेत्।
प्रजयास्य पशुभिर्वितिष्ठेरन्। यत्तर्पयेत्। तृप्ता एनं प्रजया पशुभिस्तर्प
येयुः। सजूर्देवैस्सायं यावभिरिति सायग्ं संमृशति। सजूर्देवैः

P.No.

प्रातर्याविभिरिति प्रातः। येचैव देवास्सायं यावानो येच प्रातर्यावाणः।
(43) तानेवोभयाग्ंस्तर्पयति। तएनं तृप्ताः प्रजया पशुभिस्तर्पयन्ति।
अरुणो ह स्मा हौपवेशिः। अग्निहोत्र एवाहग्ं सायं प्रातर्वज्रं भ्रातृव्ये
भ्यः प्रहरामि। तस्मान्मत्पापीयाग्ंसो भ्रातृव्या इति। चतुरुन्नयति।
द्विर्जुहोति। सामित्सप्तमी। सप्तपदा शक्वरी। शाक्वरो वज्रः। अग्निहोत्र
एव तत्सायं प्रातर्वज्रं यजमानो भ्रातृव्याय प्रहरति। भवत्यात्मना।
परास्य भ्रातृव्यो भवति। (44) 5

प्रजापतिरकामयतात्मन्वन्मे जायेतेति। सोजुहोत्। तस्यात्मन्वदजायत।
अग्निर्वायुरादित्यः। तेब्रुवन्। प्रजापतिरहौषीदात्मन्वन्मे जायेतेति। तस्य
वयमजनिष्महि। जायतांन आत्मन्वदिति। तेजुहवुः। प्राणानामग्निः। तनुवै
वायुः। (45) चक्षुष आदित्यः। तेषाग्ं हुतादजायत गौरेव। तस्यै पयसि व्या
यच्छन्त। ममहुतादजनि ममेति। ते प्रजापतिं प्रश्नमायन्। स आदित्योग्नि
मब्रवीत्। यतरो नौ जयात्। तन्नौ सहासदिति। कस्यै कोहौषीदिति प्रजापति
रब्रवीत्कस्यैक इति। प्राणानामहमित्यग्निः। (46) तनुवा अहमिति वायुः।
चक्षुषो हमित्यादित्यः। य एव प्राणानामहौषीत्। तस्य हुतादजनीति। अग्ने
र्हुतादजनीति। तदग्निहोत्रस्याग्निहोत्रत्वम्। गौर्वा अग्निहोत्रम्। य एवं
वेद गौरग्निहोत्रमिति। प्राणापानाभ्यामेवाग्निग्ं समर्धयति। अन्वृधुकः

P.No.

प्राणापानाभ्यां भवति। (47) य एवं वेद। तौ वायुरब्रवीत्। अनु मा भजत
मिति। यदेव गार्हपत्येऽधिश्रित्याहवनीयमभ्युद्रवान्। तेन त्वां प्रीणानित्य
ब्रूताम्। तस्माद्गार्हपत्येऽधिश्रित्याहवनीयमभ्युद्रवति। वायुमेव तेन प्री
णाति। प्रजापतिर्देवतास्सृजमानः। अग्निमेव देवतानां प्रथममसृजत।
सोऽन्यदालम्भ्यमवित्वा। (48) प्रजापतिमभिपर्यावर्तत। स मृत्योरबिभेत्।
सोऽमुमादित्यमात्मनो निरमिमीत। तꣳ हुत्वा पराङ्पर्यावर्तत। ततो वै स
मृत्युमपाजयत। अप मृत्युं जयति। य एवं वेद। तस्माद्यस्यैवं विदुषः। उतैकाहमुतद्व्यहं न जुह्व
ति। हुतमेवास्य भवति। असौ ह्यादित्योऽग्निहोत्रम्। (49) 6

रौद्रं गवि। वायव्यमुपसृष्टम्। आश्विनं दुह्यमानम्। सौम्यं दुग्धम्। वारुण
मधिश्रितम्। वैश्वदेवा बिन्दवः। पौष्णमुदन्तम्। सारस्वतं विष्यन्दमानम्।
मैत्रꣳ शरः। धातुरुद्वासितम्। बृहस्पतेरुन्नीतम्। सवितुः प्रक्रान्तम्।
द्यावापृथिव्यꣳ ह्रियमाणम्। ऐन्द्राग्नमुपसन्नम्। अग्नेः पूर्वाहुतिः।
प्रजापतेरुत्तरा। ऐन्द्रꣳ हुतम्। (50) 7

दक्षिणत उपसृजति। पितृलोकमेव तेन जयति। प्राचीमावर्तयति। देवलोकमेव तेन
जयति। उदीचीमावृत्य दोग्धि। मनुष्यलोकमेव तेन जयति। पूर्वौ दुह्याज्ज्येष्ठ
स्य ज्यैष्ठिनेयस्य। यो वा गतश्रीस्स्यात्। अपरौ दुह्यात्कनिष्ठस्य कानिष्ठि

P.No.

1 अर्यम्ण उद्वास्यमानम् ।

नेयस्या योवानुभूषेत। (51) न संमृशाति । पावस्य सस्य०यावृत्त्यै ।
वायव्यं वा एतदुपसृष्टम् । आश्विनं दुह्यमानम् । मैत्रं दुग्धम् । त्वाष्ट्र
मुन्नीयमानम् । बृहस्पते रुन्नीतम् । सवितुः प्रक्रान्तम् । द्यावापृथिव्यगं
ह्रियमाणम् । (52) ऐन्द्राग्नमुपसादितम् । सर्वाभ्यो वा एष देवताभ्यो
जुहोति । योऽग्निहोत्रं जुहोति । यथा खलु वै धेनुं तीर्थे तर्पयति । एवमग्नि
होत्री यजमानं तर्पयति । तृप्यति प्रजया पशुभिः । प्र सुवर्गं लोकं जानाति ।
पश्यति पुत्रम् । पश्यति पौत्रम् । प्र प्रजया पशुभिर्मिथुनैर्जायते । यस्यैवं
विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद । (53) 8

त्रयो वै प्रैयमेधा आसन् । तेषां त्रिरेकोऽग्निहोत्रमजुहोत् । द्विरेकः । सकृदेकः ।
तेषां यस्त्रिरजुहोत् । स कृच्चाजुहोत् । यो द्विः स यजुषा । यस्सकृत् ।
स तूष्णीम् । (54) यश्च यजुषा जुहोद्यश्च तूष्णीम् । तावुभावार्ध्नुताम् ।
तस्माद्यजुषाहुतिः पूर्वा होतव्या । तूष्णीमुत्तरा । उभे एवर्धी अवरुन्धे ।
अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोति । रेत एव तद्दधाति । सूर्यो
ज्योतिर्ज्योतिस्सूर्यस्स्वाहेति प्रातः । रेत एव हितं प्रजनयति । रेतो वा एतस्य
हितं न प्रजायते । (55) यस्याग्निहोत्रमहुतगं सूर्योऽभ्युदेति । यद्यन्तं स्यात् । उन्नीय
प्राङुदाद्रवेत् । स उपसाद्यातमितोरासीत । स यदा ताम्येत् । अथ भूस्स्वाहेति
जुहुयात् । प्रजापतिर्वै भूतः । तमेवोपासरत् । स एवैनं तत उन्नयति ।

P.No.

नार्तिमार्च्छति यजमानः । (56) 9

यदग्निमुद्धरति । वसवस्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति ।
वसुष्वेवास्याग्निहोत्रꣳ हुतं भवति । निहितो धूपायञ्छेते । रुद्रास्तर्ह्यग्निः ।
तस्मिन् यस्य तथाविधे जुह्वति । रुद्रेष्वेवास्याग्निहोत्रꣳ हुतं भवति । प्रथम
मिध्ममर्चिरालभते । आदित्यास्तर्ह्यग्निः । (57) तस्मिन् यस्य तथाविधे
जुह्वति । आदित्येष्वेवास्याग्निहोत्रꣳ हुतं भवति । सर्व एव सर्वश इध्म आ
दीप्तो भवति । विश्वे देवास्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति ।
विश्वेष्वेवास्य देवेष्वग्निहोत्रꣳ हुतं भवति । नितरामर्चिरुपावैति
लोहिनीकेव भवति । इन्द्रस्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति ।
इन्द्र एवास्याग्निहोत्रꣳ हुतं भवति । (58) अङ्गारा भवन्ति । तेभ्योऽङ्गारेभ्यो
र्चिरुदेति । प्रजापतिस्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । प्रजाप
तावेवास्याग्निहोत्रꣳ हुतं भवति । शरोऽङ्गारा अध्यूहन्ते । ब्रह्म तर्ह्यग्निः ।
तस्मिन् यस्य तथाविधे जुह्वति । ब्रह्मन्नेवास्याग्निहोत्रꣳ हुतं भवति ।
वसुषु रुद्रेष्वादित्येषु । विश्वेषु देवेषु । इन्द्रे प्रजापतौ ब्रह्मन् । अप
रिवर्गमेवास्यैतासु देवतासु हुतं भवति । यस्यैवं विदुषोऽग्निहोत्रं
जुह्वति । य उ चैनदेवं वेद । (59) 10

P.No.

ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति।
सत्यं त्वर्तेन परिषिञ्चामीति प्रातः। अग्निर्वा ऋतम्।
असावादित्यस्सत्यम्। अग्निमेव तदादित्येन सायं
परिषिञ्चति। अग्निनाऽऽदित्यं प्रातस्सह। यावदहोरात्रे भवतः।
तावदस्य लोकस्यार्तिर्नारिष्टिः। नान्तो न पर्यन्तोऽस्ति। यस्यैवं
विदुषोऽग्निहोत्रं जुह्वति। य उ चैनदेवं वेद। (60)॥

इति द्वितीयाष्टके प्रथमः प्रश्नः

द्वितीयाष्टके द्वितीयः प्रश्नः

ओम्। प्रजापतिरकामयत प्रजास्सृजेयेति। स एतं दशहोतारमप श्यत्। तं मनसानुद्रुत्य दर्भस्तम्बेजुहोत्। ततो वै स प्रजा असृजत। ता अस्मात्सृष्टा अपाक्रामन्। ता ग्रहेणागृह्णात्। तद्ग्रहस्य ग्रहत्वम्। यः कामयेत प्रजायेयेति। स दशहोतारं मनसानुद्रुत्य दर्भस्तम्बे जुहुयात्। प्रजापतिर्वै दशहोता। (1) प्रजापतिरेव भूत्वा प्रजायते। मनसा जुहोति। मन इव हि प्रजापतिः। प्रजापतेराप्त्यै। पूर्णया जुहोति। पूर्ण इव हि प्रजापतिः। प्रजापतेराप्त्यै। न्यूनया जुहोति। न्यूनाद्धि प्रजापतिः प्रजा असृजत। प्रजानाꣳ सृष्ट्यै। (2) दर्भस्तम्बे जुहोति। एतस्माद्वै योनेः प्रजापतिः प्रजा असृजत। यस्मादेव योनेः प्रजापतिः प्रजा असृजत। तस्मादेव योनेः प्रजायते। ब्राह्मणो दक्षिणत उपास्ते। ब्राह्मणो वै प्रजानामुपद्रष्टा। उपद्रष्टुमत्येव प्रजायते। ग्रही भवति। प्रजानाꣳ सृष्टानां धृत्यै। यं ब्राह्मणं विद्यां विद्वाꣳसं यशो नर्च्छेत्। (3) सोऽरण्यं परेत्य। दर्भस्तम्बमुद्ग्रथ्य। ब्राह्मणं दक्षिणतो निषाद्य। चतुर्होतॄन्व्याचक्षीत। एतद्वै देवानां परमं गुह्यं ब्रह्म। यच्चतुर्होतारः। तदेव प्रकाशं गमयति। तदेनं प्रकाशं गतम्। प्रकाशं प्रजानां गमयति। दर्भस्तम्बमुद्ग्रथ्य व्याचष्टे। (4) अग्निवान्वै दर्भस्तम्बः। अग्निवत्येव व्याचष्टे। ब्राह्मणो दक्षिणत उपास्ते। ब्राह्मणो वै प्रजानामुपद्रष्टा। उपद्रष्टुमत्येवैनं यश ऋच्छति। ईश्वरं तं यशोऽर्तोरित्याहुः। यस्यान्ते व्याचष्ट इति। वरस्तस्मै

P.No.

देयः। यद्देवैनं तत्रोपनमति। तद्देवावरुन्धे। (5) अग्निमादधानो दश
~~होतारं व्याचक्षीत~~ होत्रारणिमवदध्यात्। प्रजातमेवैनमाधत्ते। तेनैवोद्रु
त्याग्निहोत्रं जुहुयात्। प्रजातमेवैनञ्जुहोति। हविर्निर्वप्स्यन्दशहोतारं व्या
चक्षीत। प्रजातमेवैनन्निर्वपति। सामिधेनीरनुवक्ष्यन्दशहोतारं व्याचक्षीत।
सामिधेनीरेव सृष्ट्वारभ्य प्रतनुते। अथो यज्ञो वै दशहोता। यज्ञमेव तनु
ते। (6) अभिचरन्दशहोतारं जुहुयात्। नव वै पुरुषे प्राणाः। नाभिर्दशमी।
सप्राणमेवैनमभिचरति। एतावद्वै पुरुषस्य स्वम्। यावत्प्राणाः। याव
देवास्यास्ति। तदभिचरति। स्वकृत इरिणे जुहोति प्रदरे वा। एतद्वा अस्यै
निर्ऋतिगृहीतम्। निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति। यद्वाचः
क्रूरम्। तेन वषट्करोति। वाच एवैनं क्रूरेण प्रवृश्चति। ताजगार्तिमार्छति। (7)।

प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति। स एतं चतुर्होतारमपश्यत्।
तं मनसानुद्रुत्याहवनीये जुहोत्। ततो वै स दर्शपूर्णमासावसृजत। ताव
स्मात्सृष्टावपाक्रामताम्। तौ ग्रहेणागृह्णात्। तद्ग्रहस्य ग्रहत्वम्।
दर्शपूर्णमासावालभमानः। चतुर्होतारं मनसानुद्रुत्याहवनीये जुहुयात्।
दर्शपूर्णमासावेव सृष्ट्वारभ्य प्रतनुते। (8) ग्रहो भवति। दर्शपूर्णमासयो
स्सृष्टयोर्धृत्यै। सोऽकामयत चातुर्मास्यानि सृजेयेति। स एतं पञ्चहोतारम
पश्यत्। तं मनसानुद्रुत्याहवनीये जुहोत्। ततो वै स चातुर्मास्या

P.No.

न्यसृजत। तान्यस्मात्सृष्टान्यपाक्रामन्। तानि ग्रहेणागृह्णात्। तद्ग्रहस्य
ग्रहत्वम्। चातुर्मास्यान्यालभमानः। (9) पंचहोतारं मनसानुद्रुत्याह
वनीये जुहुयात्। चातुर्मास्यान्येव सृष्ट्वारभ्य प्रतनुते। ग्रहो भवति। चातुर्मा
स्यानां सृष्टानां धृत्यै। सोऽकामयत पशुबन्धं सृजेयेति। स एतं षड्ढोता
रमपश्यत्। तं मनसानुद्रुत्याहवनीये जुहोत्। ततो वै स पशुबन्धमसृजत। सोऽस्मा
त्सृष्टोऽपाक्रामत्। तं ग्रहेणागृह्णात्। (10) तद्ग्रहस्य ग्रहत्वम्। पशु
बन्धेन यक्ष्यमाणः। षड्ढोतारं मनसानुद्रुत्याहवनीये जुहुयात्। पशुबन्ध
मेव सृष्ट्वारभ्य प्रतनुते। ग्रहो भवति। पशुबन्धस्य सृष्टस्य धृत्यै।
सोऽकामयत सौम्यमध्वरं सृजेयेति। स एतं सप्तहोतारमपश्यत्।
तं मनसानुद्रुत्याहवनीये जुहोत्। ततो वै स सौम्यमध्वरमसृजत। (11)
सोऽस्मात्सृष्टोऽपाक्रामत्। तं ग्रहेणागृह्णात्। तद्ग्रहस्य ग्रहत्वम्। दीक्षि
ष्यमाणः। सप्तहोतारं मनसानुद्रुत्याहवनीये जुहुयात्। सौम्यमेवाध्वरं
सृष्ट्वारभ्य प्रतनुते। ग्रहो भवति। सौम्यस्याध्वरस्य सृष्टस्य धृत्यै।
देवेभ्यो वै यज्ञो न प्राभवत्। तमेतावच्छस्समभरन्। (12) यत्संभाराः।
ततो वै तेभ्यो यज्ञः प्राभवत्। यत्संभारा भवन्ति। यज्ञस्य प्रभूत्यै। आति
थ्यमासाद्य व्याचष्टे। यज्ञमुखं वा आतिथ्यम्। मुखत एव यज्ञं संभृत्य प्रत
नुते। अयज्ञो वा एषः। योऽपत्नीकः। न प्रजाः प्रजायेरन्। पत्न्यो व्याचष्टे।
यज्ञमेवाकः। प्रजानां प्रजननाय। उपसत्सु व्याचष्टे। एतद्वै पत्नीना

P.No.

मायतनम् । स्व एवैना आयतने वकल्पयति । (13) २

प्रजापतिरकामयत प्रजायेयेति । स तपोऽतप्यत । स त्रिवृतꣳ स्तोममसृ
जत । तं पञ्चदशस्स्तोमो मध्यत उदतृणत् । तौ पूर्वपक्षश्चापरपक्षश्चाभ
वताम् । पूर्वपक्षं देवा अन्वसृज्यन्त । अपरपक्षमन्वसुराः । ततो देवा अ
भवन् । परासुराः । यं कामयेत वसीयान्त्स्यादिति (14) तं पूर्वपक्षे याज
येत् । वसीयानेव भवति । यं कामयेत पापीयान्त्स्यादिति । तमपरपक्षे
याजयेत् । पापीयानेव भवति । तस्मात्पूर्वपक्षोऽपरपक्षात्करुण्यतरः ।
प्रजापतिर्वै दशहोता । चतुर्होता पञ्चहोता । षड्ढोता सप्तहोता । ऋतवस्सं
वत्सरः । (15) प्रजाः पशव इमे लोकाः । य एवं प्रजापतिं बहोर्भूयाꣳसं
वेद । बहोरेव भूयान्भवति । प्रजापतिर्देवासुरानसृजत । स इन्द्रमपि
नासृजत । तं देवा अब्रुवन् । इन्द्रं नो जनयेति । सोऽब्रवीत् । यथाहं युष्माꣳ
स्तपसाऽसृक्षि । एवमिन्द्रं जनयध्वमिति । (16) ते तपोऽतप्यन्त । त आत्म
न्निन्द्रमपश्यन् । तमब्रुवन् । जायस्वेति । सोऽब्रवीत् । किं भागधेयमभिजनिष्य
इति । ऋतून्त्संवत्सरम् । प्रजाः पशून् । इमाँल्लोकानित्यब्रुवन् । तं वै
माहुत्या प्रजनयतेत्यब्रवीत् । (17) तं चतुर्होत्रा प्राजनयन् । यः कामयेत
वीरो म आजायेतेति । स चतुर्होतारं जुहुयात् । प्रजापतिर्वै चतुर्होता । प्रजा
पतिरेव भूत्वा प्रजायते । जजनदिन्द्रमिन्द्रियाय स्वाहेति ग्रहेण जुहोति ।

P.No.

आस्य वीरो जायते वीरग्ं हि देवा एतया हुत्या प्राजनयन् । आदित्याश्चाङ्गि-
रसश्च सुवर्गे लोके स्पर्धन्त । वयं पूर्वे सुवर्गं लोकमियाम वयं पूर्व इति ।
(18) त आदित्या एतं पंचहोतारमपश्यन् । तं पुरा प्रातरनुवाकादाग्नीध्रेजु
हवुः । ततो वै ते पूर्वे सुवर्गं लोकमायन् । यस्सुवर्गकामस्स्यात् । स पंच
होतारं पुरा प्रातरनुवाकादाग्नीध्रे जुहुयात् । संवत्सरो वै पंचहोता । संव
त्सरस्सुवर्गो लोकः । संवत्सर एवर्तुषु प्रतिष्ठाय । सुवर्गं लोकमेति । तेऽब्रु
वन्नङ्गिरस आदित्यान् । (19) क्व स्थ । क्व वस्सद्भ्यो हव्यं वक्ष्याम
इति । छन्दस्स्वित्यब्रुवन् । गायत्रियां त्रिष्टुभि जगत्यामिति । तस्माच्छन्द
स्सु सद्भ्य आदित्येभ्यः । आंगीरसीः प्रजा हव्यं वहन्ति । वहन्त्यस्मै प्रजा
बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद । द्वादश मासाः पंचर्तवः ।
त्रय इमे लोकाः । असावादित्य एकविंशः । एतस्मिन्वा एष श्रितः । एत
स्मिन्प्रतिष्ठितः । य एवमेतं श्रितं प्रतिष्ठितं वेद । प्रत्येव तिष्ठति । (२०) 3

प्रजापतिरकामयत प्रजायेयेति । स एतं दशहोतारमपश्यत् । तेन दशधा
त्मानं विधाय । दशहोत्राऽतप्यत । तस्य चित्तिस्स्रुगासीत् । चित्तमाज्यम्
तस्यैतावत्येव वागासीत् । एतावान् यज्ञक्रतुः । स चतुर्होतारमसृजत ।
सोऽनन्दत् । (२१) असृक्षि वा इममिति । तस्य सोमो हविरासीत् ।
स चतुर्होत्राऽतप्यत । सोऽताम्यत । स भूरिति व्याहरत् । स भूमिमसृजत ।

P.No.

अग्निहोत्रं दर्शपूर्णमासौ यजूꣳषि । स द्वितीयमतप्यत । सोताम्यत् । स भुव इति व्याहरत् । (22) सोन्तरिक्षमसृजत । चातुर्मास्यानि सामानि । स तृतीयमतप्यत । सोताम्यत । स सुवरिति व्याहरत । स दिवमसृजत । अग्निष्टोममुक्थ्यमतिरात्रमृचः । एता वै व्याहृतय इमे लोकाः । इमान्खलु वै लोकाननु प्रजाः पशवश्छन्दाꣳसि प्राजायन्त । य एवमेताः प्रजापतेः प्रथमा व्याहृतीः प्रजाता वेद । (23) प्र प्रजया पशुभिर्मिथुनैर्जायते । स पंचहोतारमसृजत । स हविर्नाविन्दत । तस्मै सोमस्तनुवं प्रायच्छत् । एतत्ते हविरिति । स पंचहोत्रातप्यत । सोताम्यत । स प्रत्यङ्बाधत । सोऽसुरानसृजत । तदस्याप्रियमासीत् । (24) तद्दुर्वर्णꣳ हिरण्यमभवत् । तद्दुर्वर्णस्य हिरण्यस्य जन्म । स द्वितीयमतप्यत । सोताम्यत । स प्राङ्बाधत । स देवानसृजत । तदस्य प्रियमासीत् । तत्सुवर्णꣳ हिरण्यमभवत् । तत्सुवर्णस्य हिरण्यस्य जन्म । य एवꣳ सुवर्णस्य हिरण्यस्य जन्म वेद । (25) सुवर्ण आत्मना भवति । दुर्वर्णोऽस्य भ्रातृव्यः । तस्मात्सुवर्णꣳ हिरण्यं भार्यम् । सुवर्ण एव भवति । ऐनं प्रियं गच्छति नाप्रियम् । स सप्तहोतारमसृजत । स सप्तहोत्रैव सुवर्गं लोकमैत् । त्रिणवेन स्तोमेनैभ्यो लोकेभ्योऽसुरान्प्राणुदत । त्रयस्त्रिꣳशेन प्रत्यतिष्ठत् । एकविꣳशेन रुचमधत्त । (26) सप्तदशेन प्राजायत । य एवं विद्वान्त्सोमेन यजते । सप्तहोत्रैव सुवर्गं लोकमेति । त्रिणवेन स्तोमेनैभ्यो

P.No.

लोकेभ्यो भ्रातृव्यान्प्रणुदते । त्रयस्त्रिंशेन प्रतितिष्ठति । एक
विंशेन रुचं धत्ते । सप्तदशेन प्रजायते । तस्मात्सप्तदशस्तोमो
न निर्हृत्यः । प्रजापतिर्वै सप्तदशः । प्रजापतिमेव मध्यतो धत्ते
प्रजात्यै । (२७) म

देवा वै वरुणमयाजयन् । स यस्यै यस्यै देवतायै दक्षिणामनयत् ।
तामव्लीनात् । तेऽब्रुवन् । व्यावृत्य प्रतिगृह्णाम । तथा नो दक्षिणा न व्लेष्य
तीति । ते व्यावृत्य प्रत्यगृह्णन् । ततो वै तान्दक्षिणा नाव्लीनात् । य एवं
विद्वान्व्यावृत्य दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्लीनाति । (२८)
राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यमित्याह । आग्नेयं वै
हिरण्यम् । स्वयैवैनद्देवतया प्रतिगृह्णाति । सोमाय वास इत्याह ।
सौम्यं वै वासः । स्वयैवैनद्देवतया प्रतिगृह्णाति । रुद्राय गामित्याह ।
रौद्री वै गौः । स्वयैवैनां देवतया प्रतिगृह्णाति । वरुणायाश्वमित्याह ।
(२९) वारुणो वा अश्वः । स्वयैवैनं देवतया प्रतिगृह्णाति । प्रजाप
तये पुरुषमित्याह । प्राजापत्यो वै पुरुषः । स्वयैवैनं देवतया प्रति
गृह्णाति । मनवे तल्पमित्याह । मानवो वै तल्पः । स्वयैवैनं देवतया प्रति
गृह्णाति । उत्तानायाङ्गीरसायान इत्याह । इयं वा उत्तान आङ्गीरसः ।
(३०) अनयैवैनत्प्रतिगृह्णाति । वैश्वानर्यर्चा रथं प्रतिगृह्णाति ।

P.No.

वैश्वानरो वै देवतया रथः। स्वयैवैनं देवतया प्रतिगृह्णाति। तेनामृतत्व
मश्यामित्याह। अमृतमेवात्मन्धत्ते। वयो दात्र इत्याह। वय एवैनं कृत्वा।
सुवर्गं लोकं गमयति। मयो मह्यमस्तु प्रतिग्रहीत्र इत्याह। (31) यद्वै
शिवम्। तन्मयः। आत्मन एवैषा परीत्तिः। क इदं कस्मा अदादित्याह।
प्रजापतिर्वै कः। स प्रजापतये ददाति। कामः कामायेत्याह। कामेन
हि ददाति। कामेन प्रतिगृह्णाति। कामो दाता कामः प्रतिग्रहीतेत्याह। (32)
कामो हि दाता। कामः प्रतिग्रहीता। कामꣳ समुद्रमाविशेत्याह। समुद्र इव
हि कामः। नेव हि कामस्यान्तोऽस्ति। न समुद्रस्य। कामेन त्वा प्रतिगृह्णामी
त्याह। येन कामेन प्रतिगृह्णाति। स एवैनममुष्मिंल्लोके काम आगच्छति।
कामैतत्त एषा ते काम दक्षिणेत्याह। काम एव तद्यजमानोऽमुष्मिंल्लोके
दक्षिणामिच्छति। न प्रतिग्रहीतरि। य एवं विद्वान्दक्षिणां प्रतिगृह्णाति।
अनृणामेवैनां प्रतिगृह्णाति। (33) 5

अन्तो वा एष यज्ञस्य। यद्दशममहः। दशमेऽहन्त्सर्पराज्ञिया ऋग्भिस्स्तुव
न्ति। यज्ञस्यैवान्तं गत्वा। अन्नाद्यमवरुन्धते। तिसृभिस्स्तुवन्ति। त्रय
इमे लोकाः। एभ्य एव लोकेभ्योऽन्नाद्यमवरुन्धते। पृश्निवतीर्भवन्ति।
अन्नं वै पृश्नि। (34) अन्नमेवावरुन्धते। मनसा प्रस्तौति। मनसो
द्गायति। मनसा प्रतिहरति। मन इव हि प्रजापतिः। प्रजापतेराप्त्यै।

P.No.

देवा वै सर्पाः । तेषामियꣳ राज्ञी । यत्सर्पराज्ञिया ऋग्भिस्स्तुवन्ति । अस्यामेव
प्रतितिष्ठन्ति । (35) चतुर्होतॄन् होता व्याचष्टे । स्तुतमनुशꣳसति शान्त्यै ।
अन्तो वा एष यज्ञस्य । यद्दशममहः । एतत्खलु वै देवानां परमं गुह्यं ब्रह्म ।
यच्चतुर्होतारः । दशमेऽहꣳश्चतुर्होतॄन्व्याचष्टे । यज्ञस्यैवान्तं गत्वा । परमं
देवानां गुह्यं ब्रह्मावरुन्धे । तदेव प्रकाशं गमयति । (36) तदेनं प्रकाशं गतम् ।
प्रकाशं प्रजानां गमयति । वाचं यच्छति । यज्ञस्य धृत्यै । यजमानदेवत्यं
वा अहः । भ्रातृव्यदेवत्या रात्रिः । अह्ना रात्रिं ध्यायेत् । भ्रातृव्यस्यैव तल्लो
कं वृङ्क्ते । यद्दिवा वाचं विसृजेत् । अहर्भ्रातृव्यायोच्छिꣳषेत् । यन्नक्तं
विसृजेत् । रात्रिं भ्रातृव्यायोच्छिꣳषेत् । अधिवृक्षसूर्ये वाचं विसृजति ।
एतावन्तमेवास्मै लोकमुच्छिꣳषति । यावदादित्योऽस्तमेति । (37) 6

प्रजापतिः प्रजा असृजत । तास्सृष्टास्समश्लिष्यन् । ता रूपेणानुप्रावि
शत् । तस्मादाहुः । रूपं वै प्रजापतिरिति । ता नाम्नानुप्राविशत् । तस्मादा
हुः । नाम वै प्रजापतिरिति । तस्मादप्यामित्रौ संगत्य । नाम्ना चेद्ध्वयेते ।
(38) मित्रमेव भवतः । प्रजापतिर्देवासुरानसृजत । स इन्द्रमपि नासृ
जत । तं देवा अब्रुवन् । इन्द्रं नो जनयेति । स आत्मन्निन्द्रमपश्यत् । तम
सृजत । तं त्रिष्टुग्वीर्यं भूत्वानुप्राविशत् । तस्य वज्रः पञ्चदशो हस्त आ
पद्यत । तेनोदग्र्यासुरानभ्यभवत् । (39) य एवं वेद । अभिभ्रातृव्या

न्भवति। ते देवा असुरैर्विजित्य। सुवर्गं लोकमायन्। तेऽमुष्मिंल्लोके व्यक्षुध्यन्।
तेऽब्रुवन्। अमुतः प्रदानं वा उपाजिजीविमेति। ते सप्तहोतारं यज्ञं विधायाया-
स्यम्। आङ्गिरसं प्राहिण्वन्। एतेनामुत्र कल्पयेति। (40) तस्य वा इयं
क्लृप्तिः। यदिदं किंच। य एवं वेद। कल्पतेऽस्मै। स वा अयं मनुष्येषु यज्ञस्स-
प्तहोता। अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति। य एवं वेद। उपैनं यज्ञो
नमति। सोऽमन्यत। अभि वा इमेऽस्माल्लोकादमुं लोकं कमिष्यन्त इति। स
वाचस्पते हृदिति व्याहरत्। तस्मात्पुत्रो हृदयम्। तस्मादस्माल्लोकादमुं
लोकं नाभिकामयन्ते। पुत्रो हि हृदयम्। (41) 7

देवा वै चतुर्होतृभिर्यज्ञमतन्वत। ते वि पाप्मना भ्रातृव्येणाजयन्त। अभि सुवर्गं
लोकमजयन्। य एवं विद्वाग्ंश्चतुर्होतृभिर्यज्ञं तनुते। वि पाप्मना भ्रातृव्येण
जयते। अभि सुवर्गं लोकं जयति। षड्ढोत्रा प्रायणीयमासादयति। अमुष्मै
वै लोकाय षड्ढोता। घ्नन्ति खलु वा एतत्सोमम्। यदभिषुण्वन्ति। (42) ऋजु-
धैवैनममुं लोकं गमयति। चतुर्होत्रातिथ्यम्। यशो वै चतुर्होता। यश
एवात्मन्धत्ते। पंचहोत्रा पशुमुपसादयति। सुवर्ग्यो वै पंचहोता। यजमानः
पशुः। यजमानमेव सुवर्गं लोकं गमयति। ग्रहान्गृहीत्वा सप्तहोतारं जुहोति।
इन्द्रियं वै सप्तहोता। (43) इन्द्रियमेवात्मन्धत्ते। यो वै चतुर्होतॄननुसवनं
तर्पयति। तृप्यति प्रजया पशुभिः। उपैनग्ं सोमपीथो नमति।

P.No.

बहिष्पवमाने दशहोतारं व्याचक्षीत। माध्यन्दिने पवमाने चतुर्होतारम्। आर्भ
वे पवमाने पंच होतारम्। पितृयज्ञे षड्ढोतारम्। यज्ञायज्ञियस्य स्तोत्रे सप्त
होतारम्। अनुसवनमेवैनाꣳ स्तर्पयति। (44) तृप्यति प्रजया पशुभिः।
उपैनꣳ सोमपीथो नमति। देवा वै चतुर्होतृभिस्सत्त्रमासत। ऋद्धिपरिमितं
यशस्कामाः। तेऽब्रुवन्। यन्नः प्रथमं यश ऋच्छात्। सर्वेषां नस्तत्सहास
दिति। सोमश्चतुर्होत्रा। अग्निः पञ्चहोत्रा। धाता षड्ढोत्रा। (45) इन्द्र
स्सप्तहोत्रा। प्रजापतिर्दशहोत्रा। तेषाꣳ सोमꣳ राजानं यश आर्च्छत्।
तन्न्यकामयत। तेनापाक्रामत्। तेन प्रलायमचरत्। तं देवाः प्रैषैः प्रैष
मैच्छन्। तत्प्रैषाणां प्रैषत्वम्। निविद्भिर्न्यवेदयन्। तन्निविदां निवित्त्वम्। (46)
आप्रीभिराप्नुवन्। तदाप्रीणामाप्रीत्वम्। तमघ्नन्। तस्य यशो व्यगृ
ह्णत। ते ग्रहा अभवन्। तद्ग्रहाणां ग्रहत्वम्। यस्यैवं विदुषो ग्रहा गृह्य
न्ते। तस्य त्वेव गृहीताः। तेऽब्रुवन्। यो वै नः श्रेष्ठोऽभूत्। (47) तमवधि
ष्म। पुनरिमꣳ सुवामहा इति। तं छन्दोभिरसुवन्त। तच्छन्दसां छन्दस्त्वम्।
साम्ना समानयन्। तत्साम्नस्सामत्वम्। उक्थैरुदस्थापयन्। तदुक्था
नामुक्थत्वम्। य एवं वेद। प्रत्येव तिष्ठति। (48) सर्वमायुरेति। सोमो वै
यशः। य एवं विद्वान्त्सोममागच्छति। यश एवैनमृच्छति। तस्मादाहुः। यश्चै
वं वेद यश्च न। तावुभौ सोममागच्छतः। सोमो हि यशः। तं त्वाव यश ऋच्छती
त्याहुः। यस्सोमे सोमं प्राहेति। तस्मात्सोमे सोमः प्रोच्यः। यश एवैनमृच्छति।
(49) 8

P.No.

इदं वा अग्रे नैव किंचनासीत्। न द्यौरासीत्। न पृथिवी। नान्त
रिक्षम्। तदसदेव सन्मनोकुरुत स्यामिति। तदतप्यत। तस्मात्तेपानाद्धूमो
जायत। तद्भूयोतप्यत। तस्मात्तेपानादग्निरजायत। तद्भूयोतप्यत। (50)
तस्मात्तेपानाज्ज्योतिरजायत। तद्भूयोतप्यत। तस्मात्तेपानादर्चिरजायत।
तद्भूयोतप्यत। तस्मात्तेपानान्मरीचयोजायन्त। तद्भूयोतप्यत। तस्मात्तेपा
नादुदारा अजायन्त। तद्भूयोतप्यत। तदभ्रमिव समहन्यत। तद्वस्तिमभिनत्।
(51) स समुद्रोभवत्। तस्मात्समुद्रस्य न पिबन्ति। प्रजननमिव हि मन्यन्ते।
तस्मात्पशोर्जायमानादापः पुरस्ताद्यन्ति। तद्दशहोतान्वसृज्यत। प्रजापतिर्वै
दशहोता। य एवं तपसो वीर्यं विद्वांस्तप्यते। भवत्येव। तद्वा इदमापस्स
लिलमासीत्। सोरोदीत्प्रजापतिः। (52) स कस्मा अज्ञि। यद्यस्या अप्रति
ष्ठाया इति। यदप्स्ववापद्यत। सा पृथिव्यभवत्। यद्व्यमृष्ट। तदन्तरिक्ष
मभवत्। यदूर्ध्वमुदमृष्ट। सा द्यौरभवत्। यदरोदीत्। तदनयो रोदस्त्वम्।
(53) य एवं वेद। नास्य गृहे रुदन्ति। एतद्वा एषां लोकानां जन्म। य एव
मेषां लोकानां जन्म वेद। नैषु लोकेष्वार्तिमार्च्छति। स इमां प्रतिष्ठामवि
न्दत। स इमां प्रतिष्ठां वित्वाकामयत प्रजायेयेति। स तपोतप्यत। सोन्त
र्वानभवत्। स जघनादसुरानसृजत। (54) तेभ्यो मृन्मये पात्रेन्नमदु
हत्। यास्य सा तनूरासीत्। तामपाहत। सा तमिस्राभवत्। सोकामयत प्रजा
येयेति। स तपोतप्यत। सोन्तर्वानभवत्। स प्रजननादेव प्रजा असृजत।

तस्मादिमा भूयिष्ठाः। प्रजननाद्ध्येना असृजत। (55) ताभ्यो दारुमये
पात्रे पयोदुहत। यास्य सा तनूरासीत्। तामपाहत। सा जोत्स्नाभवत्।
सोऽकामयत प्रजायेयेति। सतपोऽतप्यत। सोऽन्तर्वानभवत्। स उपपक्षा
भ्यामेवर्तूनसृजत। तेभ्यो रजते पात्रे घृतमदुहत्। यास्य सातनूरा
सीत्। (56) तामपाहत। सोऽहोरात्रयोस्सन्धिरभवत्। सोऽकामयत प्रजा
येयेति। सतपोऽतप्यत। सोऽन्तर्वानभवत्। स मुखाद्देवानसृजत। तेभ्यो
हरिते पात्रे सोममदुहत। यास्य सातनूरासीत्। तामपाहत। तदहरभ
वत्। (57) एते वै प्रजापतेर्दोहाः। य एवं वेद। दुह एव प्रजाः। दिवा
वै नोऽभूदिति। तद्देवानां देवत्वम्। य एवं देवानां देवत्वं वेद। देववानेव
भवति। एतद्वा अहोरात्राणां जन्म। य एवमहोरात्राणां जन्म वेद।
नाहोरात्रेष्वार्तिमार्छति। (58) असतोऽधि मनोऽसृज्यत। मनः प्रजापति
मसृजत। प्रजापतिः प्रजा असृजत। तद्वा इदं मनस्येव परमं प्रतिष्ठि
तम्। यदिदं किंच। तदेतच्छ्वोवस्यसंनाम ब्रह्म। व्युच्छन्ती व्युच्छन्त्यस्मै
वस्यसी वस्यसी व्युच्छति। प्रजायते प्रजया पशुभिः। प्रपरमेष्ठिनो
मात्रामाप्नोति। य एवं वेद। (59) 9

P.No.

प्रजापतिरिन्द्रमसृजतानुजावरं देवानाम्। तं प्राहिणोत्। परेहि। एतेषां
देवानामधिपतिरेधीति। तं देवा अब्रुवन्। कस्त्वमसि। वयं वै त्वच्छ्रेया
ग्ंसस्स्म इति। सोऽब्रवीत्। कस्त्वमसि वयं वै त्वच्छ्रेयाग्ंस्स्म इति मा देवा
अवोचन्निति। अथ वा इदं तर्हि प्रजापतौ हर आसीत्। (60) यदस्मिन्ना
दित्ये। तदेनमब्रवीत्। एतन्मे प्रयच्छ। अथाहमेतेषां देवानामधिपतिर्भ
विष्यामीति। कोऽहग्ंस्यामित्यब्रवीत्। एतत्प्रदायेति। एतत्स्या इत्य
ब्रवीत्। यदेतद्ब्रवीषीति। को ह वै नाम प्रजापतिः। य एवं वेद। (61) विदु
रेनं नाम्ना। तदस्मै रुक्मं कृत्वा प्रत्यमुञ्चत्। ततो वा इन्द्रो देवानामधि
पतिरभवत्। य एवं वेद। अधिपतिरेव समानानां भवति। सोऽमन्यत।
किं किं वा अकरमिति। स चन्द्रं म आहरेति प्रालपत्। तच्चन्द्रमसश्चन्द्रम
स्त्वम्। य एवं वेद। (62) चन्द्रवानेव भवति। तं देवा अब्रुवन्। सुवीर्यो
मर्या यथा गोपायत इति। तत्सूर्यस्य सूर्यत्वम्। य एवं वेद। नैनं दभ्नोति।
कश्चन। अस्मिन्वा इदमिन्द्रियं प्रत्यस्थादिति। तदिन्द्रस्येन्द्रत्वम्। य एवं वेद।
इन्द्रियाव्येव भवति। (63) अयं वा इदं परमोऽभूदिति। तत्परमेष्ठिनः
परमेष्ठित्वम्। य एवं वेद। परमामेव काष्ठां गच्छति। तं देवास्समन्तं
पर्यविशन्। वसवः पुरस्तात्। रुद्रा दक्षिणतः। आदित्याः पश्चात्।
विश्वे देवा उत्तरतः। अङ्गिरसः प्रत्यञ्चम्। (64) साध्याः पराञ्चम्।
य एवं वेद। उपैनग्ं समानास्संविशन्ति। स प्रजापतिरेव भूत्वा प्रजा

P.No.

आवयत् । ता अस्मै नातिष्ठन्तान्नाद्याय । ता मुखं पुरस्तात्पश्यन्तीः । दक्षिणतः पर्यायन् । स दक्षिणतः पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । (65) पश्चात्पर्यायन् । स पश्चात्पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् । उत्तरतः पर्यायन् । स उत्तरतः पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् । (66) मुखमुत्तरतः । ऊर्ध्वा उदायन् । स उपरिष्टान्न्यवर्तयत । ताः सर्वतोमुखो भूत्वावयत् । ततो वै तस्मै प्रजा अतिष्ठन्तान्नाद्याय । य एवं विद्वान्परि च वर्तयते नि च । प्रजापतिरेव भूत्वा प्रजा आत्ती । तिष्ठन्तेस्मै प्रजा अन्नाद्याय । अन्नाद एव भवति । (67) 10

प्रजापतिरकामयत बहोर्भूयान्त्स्यामिति । स एतं दशहोतारमपश्यत् । तं प्रायुंक्त । तस्य प्रयुक्ति बहोर्भूयानभवत् । यः कामयेत बहोर्भूयान्त्स्यामिति । स दशहोतारं प्रयुञ्जीत । बहोरेव भूयान्भवति । सोकामयत वीरो म आजायेतेति । स दशहोतुश्चतुर्होतारं निरमिमीत । तं प्रायुंक्त । (68) तस्य प्रयुक्तीन्द्रोजायत । यः कामयेत वीरो म आजायेतेति । स चतुर्होतारं प्रयुञ्जीत । आस्य वीरो जायते । सोकामयत पशुमान्त्स्यामिति । स चतुर्होतुः पंचहोतारं निरमिमीत । तं प्रायुंक्त । तस्य प्रयुक्ति पशुमानभवत् । यः कामयेत पशुमान्त्स्यामिति । स पंचहोतारं प्रयुञ्जीत । (69) पशुमानेव

P.No.

भवति। सोऽकामयतर्तवो मे कल्पेरन्निति। स पंचहोतुष्षड्ढोतारं निरमिमीत।
तं प्रायुंक्त। तस्य प्रयुक्त्यृतवोऽस्मा अकल्पन्त। यः कामयेतर्तवो मे कल्पे
रन्निति। स षड्ढोतारं प्रयुञ्जीत। कल्पन्तेऽस्मा ऋतवः। सोऽकामयत सोमपस्सो
मयाजी स्याम्। आ मे सोमपस्सोमयाजी जायेतेति। (70) स षड्ढोतुस्सप्त
होतारं निरमिमीत। तं प्रायुंक्त। तस्य प्रयुक्ति सोमपस्सोमयाज्यभवत्।
आस्य सोमपस्सोमयाज्यजायत। यः कामयेत सोमपस्सोमयाजी स्याम्।
आ मे सोमपस्सोमयाजी जायेतेति। स सप्तहोतारं प्रयुञ्जीत। सोमप एव
सोमयाजी भवति। आस्य सोमपस्सोमयाजी जायते। स वा एष पशुः
पंचधा प्रतितिष्ठति। (71) पद्भिर्मुखेन। ते देवाः पशून् वित्वा। सुवर्गं
लोकमायन्। तेऽमुष्मिंल्लोके व्यक्षुध्यन्। तेऽब्रुवन्। अमुतः प्रदानं वा उप
जिजीविमेति। ते सप्तहोतारं यज्ञं विधायायास्यम्। आङ्गिरसं प्राहिण्वन्।
एतेनामुत्र कल्पयेति। तस्य वा इयं कॢप्तिः। (72) यदिदं किंच। य एवं
वेद। कल्पतेऽस्मै। स वा अयं मनुष्येषु यज्ञस्सप्तहोता। अमुत्रास
द्भ्यो देवेभ्यो हव्यं वहति। य एवं वेद। उपैनं यज्ञो नमति। यो वै चतुर्हो
तृणां निदानं वेद। निदानवान्भवति। अग्निहोत्रं वै दशहोतुर्निदानम्।
दर्शपूर्णमासौ चतुर्होतुः। चातुर्मास्यानि पंचहोतुः। पशुबन्धष्षड्ढोतुः।
सौम्योऽध्वरस्सप्तहोतुः। एतद्वै चतुर्होतृणां निदानम्। य एवं वेद। निदान
वान्भवति। (73) ॥ इति द्वितीयाष्टके द्वितीयः प्रश्नः॥

P.No.

१ चतुर्होतारः

## द्वितीयाष्टके तृतीयः प्रश्नः

ओम्। ब्रह्मवादिनो वदन्ति। किं चतुर्होतॄणां चतुर्होतृत्वमिति। यदेवैषु
चतुर्धा होतारः। तस्माच्चतुर्होतार उच्यन्ते। तच्चतुर्होतॄणां चतुर्होतृ
त्वम्। सोमो वै चतुर्होता। अग्निः पंचहोता। धाता षड्ढोता। इन्द्रस्सप्त
होता। (1) प्रजापतिर्दशहोता। य एवं चतुर्होतॄणामृद्धिं वेद। ऋध्नोत्ये
वाय एषामेवं बन्धुतां वेद। बन्धुमान्भवति। य एषामेवं क्लृप्तिं वेद।
कल्पतेऽस्मै। य एषामेवमायतनं वेद। आयतनवान्भवति। य एषा
मेवं प्रतिष्ठां वेद। (2) प्रत्येव तिष्ठति। ब्रह्मवादिनो वदन्ति। दशहोता चतुर्हो
ता। पंचहोता षड्ढोता सप्तहोता। अथ कस्माच्चतुर्होतार उच्यन्त इति।
इन्द्रो वै चतुर्होता। इन्द्रः खलु वै श्रेष्ठो देवतानामुपदेशनात्। य एव
मिन्द्रं श्रेष्ठं देवतानामुपदेशनं वेद। वसिष्ठस्समानानां भवति। तस्मा
च्छ्रेष्ठमायन्तं प्रथमेनैवानुबुध्यन्ते। अयमागन्। अयमवासादिति। कीर्तिर
स्य पूर्वागच्छति जनतामायतः। अथो एनं प्रथमेनैवानुबुध्यन्ते। अयमागन्।
अयमवासादिति। (3)।

दक्षिणां प्रतिग्रहीष्यन्त्सप्तदशकृत्वोऽपान्यात्। आत्मानमेव समिन्धे। तेजसे
वीर्याय। अथो प्रजापतिरेवैनां भूत्वा प्रतिगृह्णाति। आत्मनोऽनार्त्यै। यद्येन
मार्त्विज्याद्वृतꣳ सन्तं निर्हरेरन्। आग्नीध्रे जुहुयाद्दशहोतारं चतु
र्गृहीतेनाज्येन। पुरस्तात्प्रत्यङ् तिष्ठन्। प्रतिलोमं विग्राहम्। (4)

P.No.

प्राणानेवास्योपदासयति। यद्येनं पुनरुपशिक्षेयुः। आग्नीध्र एव
जुहुयाद्दशहोतारम्। चतुर्गृहीतेनाज्येन। पश्चात्प्राङासीनः। अनुलोम
मविग्राहम्। प्राणानेवास्मै कल्पयति। प्रायश्चित्ती वाग्घोतेत्यृतुमुख
ऋतुमुखे जुहोति। ऋतूनेवास्मै कल्पयति। कल्पन्तेऽस्मा ऋतवः। (5)
क्लृप्ता अस्मा ऋतव आयन्ति। षड्ढोता वै भूत्वा प्रजापतिरिदँ सर्व
मसृजत। स मनोऽसृजत। मनसोऽधि गायत्रीमसृजत। तद्गायत्रीं यश
आर्च्छत्। तामालभत। गायत्रिया अधि छन्दाँस्यसृजत। छन्दोभ्योऽधि
साम। तत्साम यश आर्च्छत्। तदालभत। (6) साम्नोऽधि यजूँष्यसृज
त। यजुर्भ्योऽधि विष्णुम्। तद्विष्णुं यश आर्च्छत्। तमालभत। विष्णोर
ध्योषधीरसृजत। ओषधीभ्योऽधि सोमम्। तत्सोमं यश आर्च्छत्। तमा
लभत। सोमादधि पशूनसृजत। पशुभ्योऽधीन्द्रम्। (7) तदिन्द्रं यश आ
र्च्छत्। तदेनं नातिप्राच्यवत। इन्द्र इव यशस्वी भवति। य एवं वेद। नैनं
यशोऽतिप्रच्यवते। यद्वा इदं किंच। तत्सर्वमुत्तान एवाङ्गीरसः प्रत्यगृह्णात्।
तदेनं प्रतिगृहीतं नाहिनत्। यत्किंच प्रतिगृह्णीयात्। तत्सर्वमुत्तानस्त्वाङ्
गीरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयात्। इयं वा उत्तान आङ्गीरसः।
अनयैवैनत्प्रतिगृह्णाति। नैनँ हिनस्ति। बर्हिषा प्रतीयाद्गां
वाश्वं वा। एतद्वै पशूनां प्रियं धाम। प्रियेणैवैनं धाम्ना प्रत्येति। (8) 2

P.No.

यो वा अविद्वान्निवर्तयते। विशीर्षा स पाप्मामुष्मिंल्लोके भवति। अथ यो
विद्वान्निवर्तयते। सशीर्षा विपाप्मामुष्मिंल्लोके भवति। देवता वै सप्त
पुष्टिकामान्यवर्तयन्त। अग्निश्च पृथिवी च। वायुश्चान्तरिक्षं च। आदि
त्यश्च द्यौश्च चन्द्रमाः। अग्निर्न्यवर्तयत। स साहस्रमपुष्यत। (9)
पृथिवीन्यवर्तयत। सौषधीभिर्वनस्पतिभिरपुष्यत। वायुर्न्यवर्तयत।
स मरीचीभिरपुष्यत। अन्तरिक्षं न्यवर्तयत। तद्वयोभिरपुष्यत। आदि
त्यो न्यवर्तयत। स रश्मिभिरपुष्यत। द्यौर्न्यवर्तयत। सा नक्षत्रैरपुष्यत।
चन्द्रमा न्यवर्तयत। सोऽहोरात्रैरर्धमासैर्मासैरृतुभिस्संवत्सरेणापु
ष्यत। तान्पोषान्पुष्यति। यांस्ते पुष्यन्। य एवं विद्वान्निवर्तयते परि च।

(10) 3

तस्य वा अग्नेर्हिरण्यं प्रतिजगृहुषः। अर्धमिन्द्रियस्यापाक्रामत्। तदे
तेनैव प्रत्यगृह्णात्। तेन वै सोऽर्धमिन्द्रियस्यात्मन्नुपाधत्त। अर्धमिन्द्रिय
स्यात्मन्नुपाधत्ते। य एवं विद्वान्हिरण्यं प्रतिगृह्णाति। अथ योऽविद्वा
न्प्रतिगृह्णाति। अर्धमस्येन्द्रियस्यापक्रामति। तस्य वै सोमस्य वासः प्रति
जगृहुषः। तृतीयमिन्द्रियस्यापाक्रामत्। (11) तदेतेनैव प्रत्यगृह्णात्।
तेन वै स तृतीयमिन्द्रियस्यात्मन्नुपाधत्त। तृतीयमिन्द्रियस्यात्मन्नुपाधत्ते।
य एवं विद्वान्वासः प्रतिगृह्णाति। अथ योऽविद्वान्प्रतिगृह्णाति। तृतीयमस्ये
न्द्रियस्यापक्रामति। तस्य वै रुद्रस्य गां प्रतिजगृहुषः। चतुर्थमिन्द्रियस्यापा

क्रामत्। तमेतेनैव प्रत्यगृह्णात्। तेन वै स चतुर्थमिन्द्रियस्यात्मन्नुपाधत्त। (12) चतुर्थमिन्द्रियस्यात्मन्नुपाधत्ते। य एवं विद्वान्गां प्रतिगृह्णाति। अथ योऽविद्वान्प्रतिगृह्णाति। चतुर्थमस्येन्द्रियस्यापक्रामति। तस्य वै वरुणस्याश्वं प्रतिजगृहुषः। पंचमामिन्द्रियस्यापाक्रामत्। तमेतेनैव प्रत्यगृह्णात्। तेन वै स पंचमामिन्द्रियस्यात्मन्नुपाधत्त। पंचममिन्द्रियस्यात्मन्नुपाधत्ते। य एवं विद्वानश्वं प्रतिगृह्णाति। (13) अथ योऽविद्वान्प्रतिगृह्णाति। पंचममस्येन्द्रियस्यापक्रामति। तस्य वै प्रजापतेः पुरुषं प्रतिजगृहुषः। षष्ठमिन्द्रियस्यापाक्रामत्। तमेतेनैव प्रत्यगृह्णात्। तेन वै स षष्ठमिन्द्रियस्यात्मन्नुपाधत्त। षष्ठमिन्द्रियस्यात्मन्नुपाधत्ते। य एवं विद्वान्पुरुषं प्रतिगृह्णाति। अथ योऽविद्वान्प्रतिगृह्णाति। षष्ठमस्येन्द्रियस्यापक्रामति। (14) तस्य वै मनोस्तल्पं प्रतिजगृहुषः। सप्तमामिन्द्रियस्यापाक्रामत्। तमेतेनैव प्रत्यगृह्णात्। तेन वै स सप्तमामिन्द्रियस्यात्मन्नुपाधत्त। सप्तमामिन्द्रियस्यात्मन्नुपाधत्ते। य एवं विद्वांस्तल्पं प्रतिगृह्णाति। अथ योऽविद्वान्प्रतिगृह्णाति। सप्तममस्येन्द्रियस्यापक्रामति। तस्य वा उत्तानस्याङ्गीरसस्य प्राणं प्रतिजगृहुषः। अष्टममिन्द्रियस्यापाक्रामत्। (15) तदेतेनैव प्रत्यगृह्णात्। तेन वै सोऽष्टमामिन्द्रियस्यात्मन्नुपाधत्त। अष्टमामिन्द्रियस्यात्मन्नुपाधत्ते। य एवं विद्वान्प्राणं प्रतिगृह्णाति। अथ योऽविद्वान्प्रतिगृह्णाति। अष्टमम स्येन्द्रियस्यापक्रामति। यद्वा इदं किंच। तत्सर्वमुत्तान एवांगीरसः प्रत्यगृह्णात्

P.No.

न देनं प्रतिगृहीतं नाहिनत्। यत्किंच प्रतिगृह्णीयात्। तत्सर्वमुत्तान आँ
गीरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयात्। इयंवा उत्तान आँगीरसः।
अनयैवैनत्प्रतिगृह्णाति। नैनगं हिनस्ति। (16) 4

ब्रह्मवादिनो वदन्ति। यद्दश होतारस्सत्त्रमासत। केन ते गृहपतिनार्ध्नुवन्।
केन प्रजा असृजन्तेति। प्रजापतिना वै ते गृहपतिनार्ध्नुवन्। तेन प्रजा असृ
जन्त। यच्चतुर्होतारस्सत्त्रमासत। केन ते गृहपतिनार्ध्नुवन्। केनौषधीरसृज
न्तेति। सोमेन वै ते गृहपतिनार्ध्नुवन्। (17) तेनौषधीरसृजन्त। यत्पञ्चहोतार
स्सत्त्रमासत। केन ते गृहपतिनार्ध्नुवन्। केनेभ्यो लोकेभ्योसुरान्प्राणुदन्त। केनै
षां पशूनवृञ्जतेति। अग्निना वै ते गृहपतिनार्ध्नुवन्। तेनेभ्यो लोकेभ्योसु
रान्प्राणुदन्त। तेनैषां पशूनवृञ्जत। यत्षड्ढोतारस्सत्त्रमासत। केन ते गृह
पतिनार्ध्नुवन्। (18) केनर्तूनकल्पयन्तेति। धात्रा वै ते गृहपतिनार्ध्नुवन्।
तेनर्तूनकल्पयन्त। यत्सप्तहोतारस्सत्त्रमासत। केन ते गृहपतिनार्ध्नुवन्।
केन सुवरायन्। केनेमाँल्लोकान्त्समतन्वन्निति। अर्यम्णा वै ते गृहपतिना
र्ध्नुवन्। तेन सुवरायन्। तेनेमाँल्लोकान्त्समतन्वन्निति। (19) एते वै देवा गृह
पतयः। तान् य एवं विद्वान्। अप्यन्यस्य गार्हपते दीक्षते। अवान्तरमेव
सत्त्रिणामृध्नोति। यो वा अर्यमणं वेद। दानकामा अस्मै प्रजा भवन्ति। यज्ञो
वा अर्यमा। आर्यवसातिरिति वै तमाहुर्यं प्रशगंसन्ति। आर्यवसति

P.No.

र्भवति। य एवं वेद। (२०) यदिदं किंच। तत्सर्वं चतुर्होतारः। चतुर्हो
तृभ्योऽधि यज्ञो निर्मितः। स य एवं विद्वान् विवदेत। अहमेव भूयो वेद
यश्चतुर्होतॄन्वेदेति। स ह्येव भूयो वेद। यश्चतुर्होतॄन्वेद। यो वै चतु
र्होतृणाग्ं होतॄन्वेद। सर्वासु प्रजास्वन्नमत्ति। (२१) सर्वा दिशोऽभि
जयति। प्रजापतिर्वै दशहोतृणाग्ं होता। सोमश्चतुर्होतृणाग्ं होता।
अग्निः पंचहोतृणाग्ं होता। धाता षड्ढोतृणाग्ं होता। अर्यमा सप्त
होतृणाग्ं होता। एते वै चतुर्होतृणाग्ं होतारः। तान् य एवं वेद। सर्वासु
प्रजास्वन्नमत्ति। सर्वा दिशोऽभिजयति। (२२) ५

प्रजापतिः प्रजास्सृष्ट्वा व्यस्रग्ंसत। स हृदयं भूतोऽशयत्। आत्मन् हा३इ
इत्यह्वयत्। आपः प्रत्यशृण्वन्। ता अग्निहोत्रेणैव यज्ञक्रतुनोपपर्यावर्तन्त।
ताः कुसिन्धमुपौहन्। तस्मादग्निहोत्रस्य यज्ञक्रतोः। एक ऋत्विक्।
चतुष्कृत्वोऽह्वयत्। अग्निर्वायुरादित्यश्चन्द्रमाः। (२३) ते प्रत्यशृण्वन्।
ते दर्शपूर्णमासाभ्यामेव यज्ञक्रतुनोपपर्यावर्तन्त। त उपौहग्ंश्चत्वार्य
ङ्गानि। तस्माद्दर्शपूर्णमासयोर्यज्ञक्रतोः। चत्वार ऋत्विजः। पंचकृत्वोऽह्वय
त्। पशवः प्रत्यशृण्वन्। ते चातुर्मास्यैरेव यज्ञक्रतुनोपपर्यावर्तन्त।
त उपौहँल्लोम छवीं मांसमस्थि मज्जानम्। तस्माच्चातुर्मास्यानां
यज्ञक्रतोः (२४) पंचर्त्विजः। षट्कृत्वोऽह्वयत्। ऋतवः प्रत्यशृण्वन्।

P.No.

ते पशुबन्धेनैव यज्ञक्रतुनोपपर्यावर्तन्त । त उपौहन्स्तनावाण्डौ । इडिन
मवाञ्चं प्राणम् । तस्मात्पशुबन्धस्य यज्ञक्रतोः । षड्ऋत्विजः । सप्तकृत्वो
ह्वयेत् । होत्राः प्रत्यशृण्वन् । ताः सौम्येनैवाध्वरेण यज्ञक्रतुनोपपर्याव
र्तन्त । (25) ता उपौहन्त्सप्तशीर्षण्यान्प्राणान् । तस्मात्सौम्यस्याध्व
रस्य यज्ञक्रतोः । सप्तहोत्राः प्राचीर्वषट्कुर्वन्ति । दशकृत्वो ह्वयेत् । तपः
प्रत्यशृणोत् । तत्कर्मणैव संवत्सरेण सर्वैर्यज्ञक्रतुभिरुपपर्यावर्तत ।
तत्सर्वमात्मानमपरिवर्गमुपौहत् । तस्मात्संवत्सरे सर्वे यज्ञक्रतवोऽवरु
ध्यन्ते । तस्माद्दशहोता चतुर्होता । पंचहोता षड्ढोता सप्तहोता । एक
होत्रे बलिंग्ं हरन्ति । हरन्त्यस्मै प्रजा बलिम् । ऐनमप्रतिख्यातं गच्छति ।
य एवं वेद । (26) 6

प्रजापतिः पुरुषमसृजत । सोऽग्निरब्रवीत् । ममायमन्नमस्त्विति । सोऽबि
भेत् । सर्वं वै मायं प्रधक्ष्यतीति । स एतांग्ं श्चतुर्होतृनात्मस्परणानप
श्यत् । तानजुहोत् । तैर्वै स आत्मानमस्पृणोत् । यदग्निहोत्रं जुहोति । एक
होतारमेव तद्यज्ञक्रतुमाप्नोत्यग्निहोत्रम् । (27) कुसिंधं चात्मनः स्पृणोति
आदित्यस्य च सायुज्यं गच्छति । चतुरुन्नयति । चतुर्होतारमेव तद्यज्ञक्रतु
माप्नोति दर्शपूर्णमासौ । चत्वारि चात्मनोऽङ्गानि स्पृणोति । आदित्यस्य च
सायुज्यं गच्छति । चतुरुन्नयति । समित्पञ्चमी । पंचहोतारमेव तद्यज्ञ

P.No.

क्रतुमाप्नोति चातुर्मास्यानि। लोम त्वचं माꣳसमस्थि मज्जानम्। (28)
तानि चात्मनस्स्पृणोति। आदित्यस्य च सायुज्यं गच्छति। चतुरुन्नयति
द्विर्जुहोति। षड्ढोतारमेव तद्यज्ञक्रतुमाप्नोति पशुबन्धम्। स्तनौ वाण्डौ शि
श्नमवाञ्चं प्राणम्। तानि चात्मनस्स्पृणोति। आदित्यस्य च सायुज्यं
गच्छति। चतुरुन्नयति। द्विर्जुहोति। (29) सवित्सप्तमी। सप्तहोतारमेव
तद्यज्ञक्रतुमाप्नोति सौम्यमध्वरम्। सप्त चात्मनश्शीर्षण्यान्प्राणा
न्स्पृणोति। आदित्यस्य च सायुज्यं गच्छति। चतुरुन्नयति। द्विर्जुहोति।
द्विर्निमार्ष्टि। द्विः प्राश्नाति। दशहोतारमेव तद्यज्ञक्रतुमाप्नोति संवत्सरम्।
सर्वं चात्मानमपरिवर्गꣳ स्पृणोति। आदित्यस्य च सायुज्यं गच्छति।
(30) 7

प्रजापतिरकामयत प्रजायेयेति। स तपोऽतप्यत। सोऽन्तर्वानभवत्। स
हरितश्श्यावोऽभवत्। तस्मात्स्त्र्यन्तर्वत्नी। हरिणी सती श्यावा भवति।
स विजायमानो गर्भेणाताम्यत्। स तान्तः कृष्णश्श्यावोऽभवत्। तस्मा
त्तान्तः कृष्णश्श्यावो भवति। तस्यासुरेवाजीवत्। (31) तेनासुनासुरा
नसृजत। तदसुराणामसुरत्वम्। य एवमसुराणामसुरत्वं वेद। असुमानेव
भवति। नैनमसुर्जहाति। सोऽसुरान्त्सृष्ट्वा पितेवामन्यत। तदनु पितॄन
सृजत। तत्पितॄणां पितृत्वम्। य एवं पितॄणां पितृत्वं वेद। पितेवैव
स्वानां भवति। (32) यन्त्यस्य पितरो हवम्। स पितॄन्त्सृष्ट्वामनस्यत्।

तदनु मनुष्यान सृजत। तन्मनुष्याणां मनुष्यत्वम्। य एवं मनुष्या
णां मनुष्यत्वं वेद। मनस्व्येव भवति। नैनं मनुर्जहाति। तस्मै मनुष्या
न्त्स सृजानाय। दिवा देवत्रा भवत्। तदनु देवानसृजत। तद्देवानां देवत्वम्।
य एवं देवानां देवत्वं वेद। दिवा हैवास्य देवत्रा भवति। तानिवा एतानि चत्वा
र्यम्भांसि। देवा मनुष्याः पितरोऽसुराः। तेषु सर्वेष्वम्भो नभ इव भवति।
य एवं वेद। (33) 4

ब्रह्मवादिनो वदन्ति। यो वा इमं विद्यात्। यतोयं पवते। यदभि पवते।
यदभिसंपवते। सर्वमायुरियात्। न पुरायुषः प्रमीयेत। पशुमान्त्स्यात्।
विन्देत प्रजाम्। यो वा इमं वेद। (34) यतोयं पवते। यदभिपवते। यदभि
संपवते। सर्वमायुरेति। न पुरायुषः प्रमीयते। पशुमान्भवति। विन्दते प्र
जाम्। अद्भ्यः पवते। अपोभिपवते। अपोभिसंपवते। (35) अस्याः
पवते। इमामभिपवते। इमामभिसंपवते। अग्नेः पवते। अग्निमभिपव
ते। अग्निमभिसंपवते। अन्तरिक्षात्पवते। अन्तरिक्षमभिपवते। अन्तरिक्ष
मभिसंपवते। आदित्यात्पवते। (36) आदित्यमभिपवते। आदित्यमभि
संपवते। द्योः पवते। दिवमभिपवते। दिवमभिसंपवते। दिग्भ्यः पवते।
दिशोभिपवते। दिशोभिसंपवते। स यत्पुरस्ताद्वाति। प्राण एव भूत्वा पुर
स्ताद्वाति। (37) तस्मात्पुरस्ताद्वान्तम्। सर्वाः प्रजाः प्रतिनन्दन्ति।

P.No.

प्राणो हि प्रियः प्रजानाम्। प्राण इव प्रियः प्रजानां भवतीय एवं वेद।
स वा एष प्राण एव। अथ यद्दक्षिणतो वाति। मातरिश्वैव भूत्वा दक्षिणतो
वाति। तस्माद्दक्षिणतो वान्तं विद्यात्। सर्वा दिश आ वाति। (38) सर्वा दिशो
नु विवाति। सर्वा दिशोनु संवातीति। स वा एष मातरिश्वैव। अथ यत्पश्चा
द्वाति। पवमान एव भूत्वा पश्चाद्वाति। पूतमस्मा आ हरन्ति। पूतमुप
हरन्ति। पूतमश्नाति। य एवं वेद। स वा एष पवमान एव। (39) अथ य
दुत्तरतो वाति। सवितैव भूत्वोत्तरतो वाति। सवितेव स्वानां भवति। य एवं
वेद। स वा एष सवितैव। ते य एनं पुरस्तादायन्तमुपवदन्ति। य एवास्य
पुरस्तात्पाप्मानः तांगंस्तेपघ्नन्ति। पुरस्तादितरान्पाप्मनस्सचन्ते।
अथ य एनं दक्षिणत आयन्तमुपवदन्ति। (40) य एवास्य दक्षिणतः पाप्मा
नः तांगंस्तेपघ्नन्ति। दक्षिणत इतरान्पाप्मनस्सचन्ते। अथ य एनं पश्चा
दायन्तमुपवदन्ति। य एवास्य पश्चात्पाप्मानः तांगंस्तेपघ्नन्ति। पश्चा
दितरान्पाप्मनस्सचन्ते। अथ य एनमुत्तरत आयन्तमुपवदन्ति। य एवा
स्योत्तरतः पाप्मानः तांगंस्तेपघ्नन्ति। (41) उत्तरत इतरान्पाप्मनस्स
चन्ते। तस्मादेवं विद्वान्। वीव नृत्येत। प्रेव चलेत्। यस्यैवाक्ष्यो भाषेत।
मण्टयेदिवा क्राथयेदिवा इङ्गायेतेवा। उत मोपवदेयुः। उत मे पाप्मानमपहन्यु
रिति। स यां दिशगं सनिमेष्यन्स्यात्। यदा तां दिशं वातो वायात्। अथ प्रवेयात्।
प्र वा धावयेत्। सात मेव रदितं व्यूढं गन्धमभिप्रच्यवते। आस्य तं जनपदं

P.No.

पूर्वकीर्तिर्गच्छति । दानकामा अस्मै प्रजा भवन्ति । य एवं वेद । (42) 9

प्रजापतिस्सोमग्ं राजानमसृजत । तं त्रयो वेदा अन्वसृज्यन्त । तान् हस्ते कुरुत । अथ ह सीता सावित्री । सोमग्ं राजानं चकमे । श्रद्धामु स चकमे । सा ह पितरं प्रजापतिमुपससार । तग्ं होवाच । नमस्ते अस्तु भगवः । उप त्वा यानि । (43) प्र त्वा पद्ये । सोमं वै राजानं कामये । श्रद्धामु स कामयत इति । तस्या उ ह स्थागरमलंकारं कल्पयित्वा । दशहोतारं पुरस्ताद्व्याख्याय । चतुर्होतारं दक्षिणतः । पंचहोतारं पश्चात् । षड्ढोतारमुत्तरतः । सप्तहोतारमुपरिष्टात् । संभारैश्च पत्निभिश्च मुखेऽलंकृत्य । (44) आस्यार्धं वव्राज । तग्ं ह दीक्षयोवाच । उप मावर्तस्वेति । तग्ं होवाच । भोगं तु म आचक्ष्व । एतन्म आचक्ष्व । यत्ते पाणाविति । तस्या उ ह त्रीन् वेदान् प्रददौ । तस्मा उ ह स्त्रियो भोगमेव हारयन्ते । स यः कामयेत प्रियस्स्यामिति । (45) यं वा कामयेत प्रियस्स्यादिति । तस्मा एतग्ं स्थागरमलंकारं कल्पयित्वा । दशहोतारं पुरस्ताद्व्याख्याय । चतुर्होतारं दक्षिणतः । पंचहोतारं पश्चात् । षड्ढोतारमुत्तरतः । सप्तहोतारमुपरिष्टात् । संभारैश्च पत्निभिश्च मुखेऽलंकृत्य । आस्यार्धं व्रजेत् । प्रियो हैव भवति । (46) 10

ब्रह्मात्मन्वदसृजत । तदकामयत । समात्मना पद्येयेति । आत्मन्नात्मन्नि

[ चँतुर्हूतो ह वै नामैषः।

त्यामन्त्रयत। तस्मै दशमगं हूतः प्रत्यशृणोत्। स दशहूतोभवत्। दशहूतो ह वै
नामैषः। तं वा एतं दशहूतगं सन्तम्। दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया
इव हि देवाः। (47) आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै सप्तमगं हूतः प्रत्यशृ
णोत्। स सप्तहूतोभवत्। सप्तहूतो ह वै नामैषः। तं वा एतगं सप्तहूतगं सन्तम्।
सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन्नित्याम
न्त्रयत। तस्मै षष्ठगं हूतः प्रत्यशृणोत्। स षड्ढूतोभवत्। (48) षड्ढूतो ह वै
नामैषः। तं वा एतगं षड्ढूतगं सन्तम्। षड्ढोतेत्याचक्षते परोक्षेण। परोक्ष
प्रिया इव हि देवाः। आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै पंचमगं हूतः प्रत्यशृ
णोत्। स पंचहूतोभवत्। पंचहूतो ह वैनामैषः। तं वा एतं पंचहूतगं सन्तम्।
पंचहोतेत्याचक्षते परोक्षेण। (49) परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन्नि
त्यामन्त्रयत। तस्मै चतुर्थगं हूतः प्रत्यशृणोत्। स चतुर्हूतोभवत्। तं वा एतं
चतुर्हूतगं सन्तम्। चतुर्होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः।
तमब्रवीत्। त्वं वै मे नेदिष्ठगं हूतः प्रत्यश्रौषीः। त्वयैनानाख्यातार
इति। तस्मान्नु हैनागं चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः पुत्रा
णागं हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद।

इति द्वितीयाष्टके तृतीयः प्रश्नः (50) ॥

P.No.

द्वितीयाष्टके चतुर्थः प्रश्नः

ओम्। जुष्टो दमूना अतिथिर्दुरोणे। इमं नो यज्ञमुपयाहि विद्वान्। विश्वा अग्ने
भियुजो विहत्य। शत्रूयतामाभरा भोजनानि। अग्ने शर्ध महते सौभगाय।
तव द्युम्नान्युत्तमानि सन्तु। संजास्पत्यꣳ सुयममाकृणुष्व। शत्रूयतामभि
तिष्ठा महाꣳसि। अग्ने यो नो अभितो जनः। वृको वारो जिघाꣳसति। (1) ताꣳ
स्त्वं वृत्रहन् जहि। वस्वस्मभ्यमाभर। अग्ने यो नोऽभिदासति। समानो यश्च
निष्ट्यः। इध्मस्येव प्रक्षायतः। मा तस्योच्छेषि किंचन। त्वमिन्द्राभिभू
रसि। देवो विज्ञातवीर्यः। वृत्रहा पुरुचेतनः। अपप्राच इन्द्र विश्वाꣳ अमि
त्रान्। (2) अपापाचो अभिभूतेनुदस्व। अपोदीचो अपशूराधराच उ
रौ। यथा तव शर्मन्मदेम। तमिन्द्रं वाजयामसि। महे वृत्राय हन्तवे। स वृषा
वृषभो भुवत्। युजे रथं गवेषणꣳ हरिभ्याम्। उप ब्रह्माणि जुजुषाणम
स्थुः। वि बाधिष्टास्य रोदसी महित्वा। इन्द्रो वृत्राण्यप्रती जघन्वान्। (3)
हव्यवाहमभिमातिषाहम्। रक्षोहणं पृतनासु जिष्णुम्। ज्योतिष्मन्तं दीद्यतं
पुरन्धिम्। अग्निꣳ स्विष्टकृतमाहुवेम। स्विष्टमग्ने अभितत्पृणाहि।
विश्वा देव पृतना अभिष्य। उरुं नः पन्थां प्रदिशन्विभाहि। ज्योतिष्मद्धे
ह्यजरं न आयुः। त्वामग्ने हविष्मन्तः। देवं मर्तास ईडते। (4) मन्ये त्वा जात
वेदसम्। स हव्या वक्ष्यानुषक्। विश्वानि नो दुर्गहा जातवेदः। सिन्धुं न नावा
दुरिताति पर्षि। अग्ने अत्रिवन्मनसा गृणानः। अस्माकं बोध्यविता तनू
नाम्। पूषा गा अन्वेतु नः। पूषा रक्षत्वर्वतः। पूषा वाजꣳ सनोतु नः।

P.No.

पूषेमा आशा अनुवेद सर्वाः (5) सो अस्मागं अभयतमेन नेषत्। स्वस्ति
दा अघृणिस्सर्ववीरः। अप्रयुच्छन्पुर एतु प्रजानन्। त्वमग्ने सप्रथा असि।
जुष्टो होता वरेण्यः। त्वया यज्ञं वितन्वते। अग्नी रक्षागंसि सेधति। शुक्र
शोचिरमर्त्यः। शुचिः पावक ईड्यः। अग्ने रक्षाणो अगंहसः। (6) प्रतिष्म
देव रीषतः। तपिष्ठैरजरो दह। अग्ने हगंसिन्यत्रिणम्। दीद्यन्मर्त्येष्वा।
स्वे क्षये शुचिव्रत। आवात वाहि भेषजम्। विवात वाहि यद्रपः। त्वगंहि विश्व
भेषजः। देवानां दूत ईयसे। द्वाविमौ वातौ वातः। (7) आसिन्धो रापरावतः।
दक्षं मे अन्य आवातु। परान्यो वातु यद्रपः। यददो वात ते गृहे। अमृतस्य नि
धिर्हितः। ततो नो देहि जीवसे। ततो नो धेहि भेषजम्। ततो नो मह आवह।
वात आवातु भेषजम्। शंभूर्मयोभूर्नो हृदे। (8) प्रण आयूगंषि तारिषत्।
त्वमग्ने अयासि। अया सन्मनसा हितः। अयासन् हव्यमूहिषे। अया नो धेहि
भेषजम्। इष्टो अग्निराहुतः। स्वाहाकृतः पिपर्तु नः। स्वगा देवेभ्य इदं नमः।
कामो भूतस्य भव्यस्य। सम्राडेको विराजति। (9) स इदं प्रतिपप्रथे। ऋतूनु
त्सृजते वशी। कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन्। हृदि प्रतीष्या कवयो मनीषा। त्वया मन्यो
सरथमारुजन्तः। हर्षमाणासो धृषता मरुत्वः। तिग्मेषव आयुधा सगंशि
उप
शानाः। अभिप्रयन्ति नरो अग्निरूपाः। (10) मन्युर्भगो मन्युरेवास देवः।
मन्युर्होता वरुणो विश्ववेदाः। मन्युं विश ईडते देवयन्तीः। पाहि नो मन्यो

P.No.

तपसाश्रमेण । त्वमग्ने व्रतभृच्छुचिः । देवाꣳ आसादया इह । अग्ने हव्या
य वोढवे । व्रतानु बिभ्रद्व्रतपा अदाभ्यः । यजानो देवाꣳ अजरस्सुवीरः ।
दधद्रत्नानि सुविदानो अग्ने । गोपाय नो जीवसे जातवेदः । (11) ।

चक्षुषो हेते मनसो हेते । वाचो हेते ब्रह्मणो हेते । यो माघायुरभिदासति । तम
ग्ने मेन्या मेनिं कृणु । यो मा चक्षुषा यो मनसा । यो वाचा ब्रह्मणा घायुरभिदास
ति । तयाग्ने त्वं मेन्या । अमुममेनिं कृणु । यत्किंचासौ मनसा यच्च वाचा ।
यज्ञैर्जुहोति यजुषा हविर्भिः । (12) तन्मृत्युर्निरृत्या संविदानः । पुरा दिष्टा
दाहुतीरस्य हन्तु । यातुधाना निरृतिरादु रक्षः । ते अस्य घ्नन्त्वनृतेन स
त्यम् । इन्द्रेषिता आज्यमस्य मथ्नन्तु । मा तत्समृद्धि यदसौ करोति । हन्मि
ते हं कृतꣳ हविः । यो मे घोरमचीकृतः । अपाञ्चौ त उभौ बाहू । अपनह्या
म्यास्यम् । (13) अपनह्यामि ते बाहू । अपनह्याम्यास्यम् । अग्ने देव
स्य ब्रह्मणा । सर्वं तेवधिषं कृतम् । पुरामुष्य वषट्कारात् । यज्ञं देवेषु नस्कृ
धि । स्विष्टमस्माकं भूयात् । मास्मान्प्रापन्नरातयः । अन्ति दूरे सतो अ
ग्ने । भ्रातृव्यस्याभिदासतः । (14) वषट्कारेण वज्रेण । कृत्याꣳ हन्मि कृता
महम् । यो मा नक्तं दिवा सायम् । प्रातश्चाह्नो निपीयति । अद्या तमिन्द्र
वज्रेण । भ्रातृव्यं पादयामसि । इन्द्रस्य गृहोसि तं त्वा । प्रपद्ये सगुस्सा
श्वः । सह यन्मे अस्ति तेन । ईडे अग्निं विपश्चितम् । (15)

P.No.

गिरा यज्ञस्य साधनम्। श्रुष्टीवानं धितावानम्। अग्ने शकेम ते वयम्।
यमं देवस्य वाजिनः। अति द्वेषाꣳसि तरेम। अवतं मा समनसौ समोकसौ।
सचेतसौ सरेतसौ। उभौ मामवतं जातवेदसौ। शिवौ भवत मद्य नः। स्वयं
कृण्वानस्सुगमप्रयावम्। (16) तिग्मशृङ्गो वृषभश्शोशुचानः। प्रत्नꣳ
सधस्थमनु पश्यमानः। आ तन्तु मग्निर्दिव्यं ततान। त्वं नस्तन्तुरुत सेतु
रग्ने। त्वं पन्था भवसि देवयानः। त्वयाग्ने पृष्ठं वयमारुहेम। अथा देवैस्सध
मादं मदेम। उदुत्तमं मुमुग्धि नः। वि पाशं मध्यमं चृत। अवाधमानि जीव
से। (17) वयꣳ सोम व्रते तव। मनस्तनूषु बिभ्रतः। प्रजावन्तो अशीमहि।
इन्द्राणी देवी सुभगा सुपत्नी। उदꣳशेन पतिविद्ये जिगाय। त्रिꣳशदस्य जघनं
योजनानि। उपस्थ इन्द्रꣳ स्थविरं बिभर्ति। सेना ह नाम पृथिवी धनंजया। विश्व
व्यचा अदितिस्सूर्यत्वक्। इन्द्राणी देवी प्रासहा ददाना। (18) सा नो देवी सुहवा
शर्म यच्छतु। आ त्वाहार्षमन्तरभूः। ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा
वांछन्तु। मा त्वद्राष्ट्रमधिभ्रशत्। ध्रुवा द्यौ ध्रुवा पृथिवी। ध्रुवं विश्वमिदं
जगत्। ध्रुवा ह पर्वता इमे। ध्रुवो राजा विशामयम्। इहैवैधि मा व्यथिष्ठाः। (19)
पर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठ। इह राष्ट्रमु धारय। अभितिष्ठ
पृतन्यतः। अधरे सन्तु शत्रवः। इन्द्र इव वृत्रहा तिष्ठ। अपः क्षेत्राणि
सञ्जयन्। इन्द्र एणमदीधरत्। ध्रुवं ध्रुवेण हविषा। तस्मै देवा अधि
ब्रुवन्। अयं च ब्रह्मणस्पतिः। (20) 2

P.No.

जुष्टीनरो ब्रह्मणा वः पितृणाम् । अक्षमव्ययन्न किला रिषाय । यच्छक्वरीषु
बृहता रवेण । इन्द्रे शुष्ममदधाथा वासिष्ठाः । पावकानस्सरस्वती । वाजेभि
र्वाजिनीवती । यज्ञं वष्टु धियावसुः । सरस्वत्यभिनो नेषि वस्यः । मापस्फरीः
पयसा मान आधक् । जुषस्व नस्सख्या वेश्या च (21) मा त्वत्क्षेत्राण्य
रणानि गन्म । वृञ्जे हविर्नमसा बर्हिरग्नौ । अयामि स्रुग्घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्याः । अश्रायि यज्ञस्सूर्येनचक्षुः । इहार्वाञ्चमति
ह्वये । इन्द्रं जैत्राय जेतवे । अस्माकमस्तु केवलः । अर्वाञ्चमिन्द्रममुतो हवा
महे । यो गोजिद्धनजिदश्वजिद्यः (22) इमन्नो यज्ञं विहवे जुषस्व । अस्य
कुर्मो हरिवो मेदिनं त्वा । असंमृष्टो जायसे मातृवोश्शुचिः । मन्द्रः कविरुदति
ष्ठो विवस्वतः । घृतेन त्वा वर्धयन्नग्न आहुत । धूमस्ते केतुरभवाद्दिवि श्रि
तः । अग्निरग्रे प्रथमो देवतानाम् । संयातानामुत्तमो विष्णुरासीत् । यजमानाय
परिगृह्य देवान् । दीक्षयेदं हविरागच्छतं नः । (23) अग्निश्च विष्णो तप
उत्तमं महः । दीक्षापालेभ्यो वनतं हि शक्रा । विश्वैर्देवैर्यज्ञियैस्संविदानौ ।
दीक्षामस्मै यजमानाय धत्तम् । प्रतद्विष्णुस्तवते वीर्याय । मृगो न भीमः
कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ।
नू मर्तो दयते सनिष्यन् यः । विष्णव उरुगायाय दाशत् । (24) प्रयस्सत्रा
चा मनसा यजातै । एतावन्तन्नर्यमा विवासात् । विचक्रमे पृथिवीमेष एताम् ।
क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिं

P.No.

सुजानिमाचकार। निर्देवः पृथिवीमेष एताम्। ~~श्लोकाय विष्णुर्विबुधे दक्ष~~
~~स्यन्य धुवासो अस्य~~ विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवस
स्तवीयान्। त्वेषग्ं ह्यस्य स्थविरस्य नाम। (२५) होतारं चित्ररथमध्व
रस्य। यज्ञस्य यज्ञस्य केतुग्ं रुशन्तम्। प्रत्यर्धिं देवस्य देवस्य मह्ना। श्रिया
त्वग्निमतिथिं जनानाम्। आनो विश्वाभिरूतिभिस्सजोषाः। ब्रह्म जुषाणो
हर्यश्व याहि। वरीवृजत्स्थविरेभिस्सुशिप्र। अस्मे दधद्वृषणग्ं शुष्ममि
न्द्र। इन्द्रस्सुवर्षा जनयन्नहानि। जिगायोशिग्भिः पृतना अभिश्रीः। (२६)
प्रारोचयन्मनवे केतुमह्नाम्। अविन्दज्ज्योतिर्बृहते रणाय। अश्विनावव्से
निह्वयेवाम्। आनूनं यातग्ं सुकृताय विप्रा। प्रातर्युक्तेन सुवृता रथेन।
उपागच्छतमवसा गतं नः। अविष्टं धीष्वश्विना न आसु। प्रजावद्रेतो अह्रयं
नो अस्तु। आवां तोके तनये तूतुजानाः। सुरत्नासो देववीतिं गमेम। (२७)
त्वग्ं सोम क्रतुभिस्सुक्रतुर्भूः। त्वं दक्षैस्सुदक्षो विश्ववेदाः। त्वं वृषा वृष
त्वेभिर्महित्वा। द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः। अषाढं युत्सु पृतनासु पप्रिम्।
सुवर्षामप्स्वां वृजनस्य गोपाम्। भरेषुजाग्ं सुक्षितिग्ं सुश्रवसम्। जय
न्तं त्वा मनु मदेम सोम। भवा मित्रो न शेव्यो घृतासुतिः। विभूतद्युम्न एवया
उ सप्रथाः। (२८) अधा ते विष्णो विदुषा चिदृध्यः। स्तोमो यज्ञस्य राध्यो
हविष्मतः। यः पूर्व्याय वेधसे नवीयसे। सुमज्जानये विष्णवे ददाशति। यो
जातमस्य महतो महि ब्रवात्। सेदुश्रवोभिर्युज्यं चिदभ्यसत्। तमु स्तोतारः

P.No.

पूर्व्यं यथा विदऋतस्य । गर्भगं हविषा पिपर्तन । आस्य जानन्तो नाम चिद्विव
क्तन । बृहत्ते विष्णो सुमतिं भजामहे । (२९) इमा धाना घृतस्नुवः । हरी इहो
पवक्षतः । इन्द्रगं सुखतमे रथे । एष ब्रह्मा प्रते महे । विदथेशगं सिषगं हरी ।
यऋत्वियः प्रतेवन्वे । वनुषो हर्यतं मदम् । इन्द्रो नाम घृतं न यः । हरिभि
श्चारु सेचते । श्रुतो गण आत्वा विशन्तु । (३०) हरिवर्पसं गिरः । आचर्षणि
प्रा वृषभो जनानाम् । राजा कृष्टीनां पुरुहूत इन्द्रः । स्तुतश्रवस्यन्नवसोपम
द्रिक् । युक्त्वा हरी वृषणा । याह्यर्वाङ् । प्रयात्सिन्धवः प्रसवं यदायन् । आप
स्समुद्रगं रथ्येव जग्मुः । अतश्चिदिन्द्रस्सदसो वरीयान् । यदीगं सोमः
पृणति दुग्धो अगंशुः । द्वयामासि त्वेन्द्र याह्यर्वाङ् । (३१) अरं ते सोम
स्तनुवे भवाति । शतक्रतो मादयस्वा सुतेषु । प्रास्मागं अव पृतनासु प्रयुत्सु ।
इन्द्राय सोमाः प्रदिवो विदानाः । ऋभुर्येभिर्वृषपर्वा विहायाः । प्रयम्यमाणा
न्प्रति षू गृभाय । इन्द्र पिब वृषधूतस्य वृष्णः । अहेउमान उपयाहि यज्ञम् ।
तुभ्यं पवन्त इन्दवस्सुतासः । गावो न वज्रिन्त्स्वमोको अच्छ । (३२) इन्द्रा
गहि प्रथमो यज्ञियानाम् । या ते काकुत्सुकृता या वरिष्ठा । यया शश्वत्पि
बसि मध्व ऊर्मिम् । तया पाहि प्रते अध्वर्युरस्थात् । संते वज्रो वर्ततामिन्द्र
गव्युः । प्रातर्युजा विबोधय । आश्विना वेह गच्छतम् । अस्य सोमस्य पीत
ये । प्रातर्यावाणा प्रथमा यजध्वम् । पुरा गृध्रादररुषः पिबाथः । प्रातर्हि
यज्ञमश्विना दधाते । प्रशगंसन्ति कवयः पूर्वभाजः । प्रातर्यजध्वमश्विना ।

P.No.

हिनोत। न सायमस्ति देवया अजुष्टम्। उतान्यो अस्मद्यजते विचायः।
पूर्वः पूर्वो यजमानो वनीयान्। (33) 3

नक्तं जाता स्योषधे। रामे कृष्णे असिक्नि च। इदगं रजनि रजय।
किलासं पलितं च यत्। किलासं च पलितं च। निरितो नाशया पृषत्।
आ त्वा स्वो अश्नुतां वर्णः। परा श्वेतानि पातय। असितं ते निलयनम्। आ
स्थानमसितं तव। (34) असिक्न्यस्योषधे। निरितो नाशया पृषत्। अ
स्थिजस्य किलासस्य। तनूजस्य च यत्त्वचि। कृत्यया कृतस्य ब्रह्मणा। लक्ष्म
श्वेतमनीनशम्। सरूपा नाम ते माता। सरूपो नाम ते पिता। सरूपास्योषधे
सा सरूपमिदं कृधि। (35) शुनगं हुवेम मघवानमिन्द्रम्। अस्मिन्भरे नृत
मं वाजसातौ। शृण्वन्तमुग्रमूतये समत्सु। घ्नन्तं वृत्राणि सञ्जितं धना
नाम्। धूनुथ द्यां पर्वतान्दाशुषे वसु। नि वो वना जिहते यामनो भिया।
कोपयथ पृथिवीं पृश्निमातरः। युधे यदुग्राः पृषतीरयुग्ध्वम्। प्रवेपय
न्ति पर्वतान्। विविञ्चन्ति वनस्पतीन्। (36) प्रोवारत मरुतो दुर्मदा इव।
देवासस्सर्वया विशा। पुरस्ताद्धि सदृङ्ङसि। विशो विश्वा अनु प्रभु। समत्सु
त्वा हवामहे। समत्स्वग्निमवसे। वाजयन्तो हवामहे। वाजेषु चित्रराधसम्। सं गच्छ
ध्वगं सं वदध्वम्। सं वो मनागंसि जानताम्। (37) देवा भागं यथा पूर्वे। सञ्जा
नाना उपासते। समानो मन्त्रस्समितिस्समानी। समानं मनस्सह चित्त

P.No.

मैषा मा। समानं केतो अभिसगं रभध्वम्। संज्ञानेन वो हविषा यजामः। समानी
व आकूतिः। समाना हृदयानि वः। समानमस्तु वो मनः। यथा वस्सु सहासति।
(38) संज्ञानं नः स्वैः। संज्ञानमरणैः। संज्ञानमश्विना युवम्। इहास्मासु
नियच्छतम्। संज्ञानं मे बृहस्पतिः। संज्ञानगं सविताकरत्। संज्ञानमश्विना।
युवम्। इह मह्यं नियच्छतम्। उपच्छायामिव घृणेः। अगन्म शर्म ते वयम्। (39)
अग्ने हिरण्यसंदृशः। अदब्धेभिस्सवितः पायुभिष्ट्वम्। शिवेभिरद्य परिपाहि नो
गयम्। हिरण्यजिह्वस्सुविताय नव्यसे। रक्षा माकिर्नो अघशंस ईशत। मदेम
देहि नो ददुः। यूथा गवां मृजुक्रतुः। संगृभाय पुरुशता। उभया हस्त्या वसु।
शिशीहि राय आभर। (40) शिप्रिन्वाजानां पते। शचीवस्तव दगंसना।
आतून इन्द्र भाजय। गोष्वश्वेषु शुभ्रिषु। सहस्रेषु तुवीमघ। यद्देवा देव
हेडनम्। देवासश्चकृमा वयम्। आदित्यास्तस्मान्मा यूयम्। ऋतस्य
र्तेन मुञ्चत। ऋतस्यर्तेनादित्याः। (41) यजत्रा मुञ्चतेह मा। यज्ञैर्वो यज्ञ
वाहसः। आशिक्षन्तो न शेकिम। मेदस्वता यजमानाः। स्रुचाज्येन जुह्वतः।
अकामा वो विश्वे देवाः। शिक्षन्तो नोपशेकिम। यदि दिवा यदि नक्तम्। एन
एनस्योकरत। भूतं मा तस्माद्भव्यं च। (42) द्रुपदादिव मुञ्चतु। द्रुपदादिवे
न्मुमुचानः। स्विन्नः स्नात्वी मलादिव। पूतं पवित्रेणेवाज्यम्। विश्वे मुञ्चन्तु
मैनसः। उद्वयं तमसस्परि। पश्यन्तो ज्योतिरुत्तरम्। देवं देवत्रा सूर्यम्।
अगन्म ज्योतिरुत्तमम्। (43) 4

P.No.

वृषासो अꣳशुः पवते हविष्मान्त्सोमः । इन्द्रस्य भाग ऋतयुः शतायुः ।
स मा वृषाणं वृषभं कृणोतु । प्रियं विशाꣳ सर्ववीरꣳ सुवीरम् । कस्य
वृषा सुते सचा । नियुत्वान्वृषभो रणत् । वृत्रहा सोमपीतये । यस्ते
शृङ्गवृषो नपात् । प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्र आ मनः । (44)
तꣳ सध्रीचीरूतयो वृष्णियानि । पौꣳस्यानि नियुतस्सश्चुरिन्द्रम् । समु
द्रं न सिन्धव उक्थशुष्माः । उरुव्यचसं गिर आविशन्ति । इन्द्राय
गिरो अनिशितसर्गाः । अपः प्रैरयन्त्सगरस्य बुध्नात् । यो अक्षेणेव
चक्रिया शचीभिः । विष्वक्तस्तम्भ पृथिवीमुत द्याम् । अक्षोदयच्छवसा
क्षाम बुध्नम् । वार्णवातस्तविषीभिरिन्द्रः । (45) दृढान्यौभ्नादुशमान ओ
जः । अवाभिनत्ककुभः पर्वतानाम् । आनो अग्ने सुकेतुना । रयिं विश्वायु
पोषसम् । मार्डीकं धेहि जीवसे । त्वꣳ सोम महे भगम् । त्वं यून ऋतायते ।
दक्षं दधासि जीवसे । रथं युञ्जते मरुतश्शुभे सुगम् । सूरो न मित्रावरुणा
गविष्टिषु । (46) रजाꣳसि चित्रा विचरन्ति तन्यवः । दिवस्सम्राजा पय
सा न उक्षतम् । वाचꣳ सुमित्रावरुणा विरावतीम् । पर्जन्यश्चित्रां वदति
त्विषीमतीम् । अभ्रा वसत मरुतस्सु मायया । द्यां वर्षयतमरुणामरेप
सम् । अयुक्त सप्त शुन्ध्युवः । सूरो रथस्य नप्त्रियः । ताभिर्याति स्व
युक्तिभिः । वहिष्ठेभिर्विहरन्यासि तन्तुम् । (47) अवव्ययन्नसितं देव
वस्वः । दविध्वतो रश्मयस्सूर्यस्य । चर्मेवावाधुस्तमो अप्स्वन्तः ।

P.No.

पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे । स नो यवसमिच्छतु । अच्छा
वद तवसं गीर्भिराभिः । स्तुहि पर्जन्यं नमसा विवास । कनिक्रदद्वृषभो
जीरदानुः । रेतो दधात्वोषधीषु गर्भम् । (48) यो गर्भमोषधीनाम् ।
गवां कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् । तस्मा इदास्ये हविः । जुहो
ता मधुमत्तमम् । इडां नस्संयतं करत् । तिस्रो यदग्ने शरदस्त्वामित् ।
शुचिं घृतेन शुचयस्सपर्यान् । नामानि चिद्दधिरे यज्ञियानि । असूदय
न्त तनुवस्सुजाताः । (49) इन्द्रश्च न शुनासीरौ । इमं यज्ञं मिमिक्ष
तम् । गर्भं धत्तग्ं स्वस्तये । ययोरिदं विश्वं भुवनमाविवेश । ययो
रानन्दो निहितो महश्च । शुनासीरावृतुभिस्संविदानौ । इन्द्रवन्तौ
हविरिदं जुषेथाम् । आ घा ये अग्निमिन्धते । स्तृणन्ति बर्हिरानुषक् ।
येषामिन्द्रो युवा सखा । अग्न इन्द्रश्च मेदिना । हथो वृत्राण्यप्रति ।
युवग्ं हि वृत्रहन्तमा । याभ्याग्ं सुवरजयन्नग्र एव । यावातस्थतु
र्भुवनस्य मध्ये । प्रचर्षणी वृषणा वज्रबाहू । अग्नी इन्द्रा वृत्रहणा
हुवे वाम् । (50) 5

उत नः प्रिया प्रियासु । सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत् । इमा जुह्वा
नायुष्मदा नमोभिः । प्रति स्तोमग्ं सरस्वति जुषस्व । तव शर्मन्प्रियतमे
दधानाः । उपस्थेयाम शरणं न वृक्षम् । त्रीणि पदा विचक्रमे । विष्णुर्गोपा

P.No.

अदाभ्यः। ततो धर्माणि धारयन्। (51) तदस्य प्रियमभि पाथो अश्याम्।
नरो यत्र देवयवो मदन्ति। उरुक्रमस्य स हि बन्धुरित्था। विष्णोः पदे परमे
मध्व उत्सः। क्रत्वा दा अस्तु श्रेष्ठः। अद्य त्वा वन्वन्त्सुरेक्णाः। मर्त आनाश
सुवृक्तिम्। इमा ब्रह्म ब्रह्मवाहः। प्रिया त आ बर्हिस्सीद। वीहि सूर पुरोडाशम्।
(52) उप नस्सूनवो गिरः। शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः।
अद्या नो देव सवितः। प्रजावत्सावीस्सौभगम्। परा दुष्वप्नियग्ं सुव।
विश्वानि देव सवितः। दुरितानि परा सुव। यद्भद्रं तन्म आसुव। शुचिमर्कैः
बृहस्पतिम्। (53) अध्वरेषु नमस्यत। अनाम्योज आचके। या धार
यन्त देवा सुदक्षा दक्षपितारा। असुर्याय प्रमहसा। स इत्क्षेति सुधित ओक
सि स्वे। तस्मा इडा पिन्वते विश्वदानीम्। तस्मै विशस्स्वयमेवानमन्ति।
यस्मिन्ब्रह्मा राजनि पूर्व एति। स कूतिमिन्द्र सच्युतिम्। सच्युतिं जघन
च्युतिम्। (54) कनात्काभान्न आ भर। प्रयस्यन्निव सक्थ्यौ। वि न
इन्द्र मृधो जहि। कनीखुनद्विव सापयन्। अभि नस्सुष्टुतिं नय। प्रजापति
स्त्रियां यशः। मुष्कयोरदधात्सपम्। कामस्य तृप्तिमानन्दम्। तस्याग्ने भाज
येह मा। मोदः प्रमोद आनन्दः। (55) मुष्कयोर्निहितस्सपः। सृत्वेव कामस्य
तृप्याणि। दक्षिणानां प्रतिग्रहे। मनसश्चित्तमाकूतिम्। वाचस्सत्यमशीमहि।
पशूनाग्ं रूपमन्नस्य। यशश्श्रीश्श्रयतां मयि। यथाहमस्या अतृपग्ं स्त्रियै
पुमान्। यथा स्त्री तृप्यति पुग्ंसि प्रिये प्रिया। एवं भगस्य तृप्याणि। (56)

P.No.

यज्ञस्यकाम्यः प्रियः। ददामीत्यग्निर्वदति। तथेति वायुराह तत्तु हन्तेति
सत्यंचन्द्रमाः। आदित्यस्सत्यमोमिति। आपस्तत्सत्यमाभरन्।
यशो यज्ञस्य दक्षिणाम्। असौ मेकामस्समृध्यताम्। नहि स्पशमविद
न्नन्यमस्मात्। वैश्वानरात्पुर एतारमग्नेः (57) अथेममन्येन्नमृतममू
राः। वैश्वानरं क्षैत्रजित्याय देवाः। येषामिमे पूर्वे अर्मास आसन्। अयूपा
स्सद्म विभृता पुरूणि। वैश्वानर त्वया ते नुत्ताः। पृथिवीमन्यामभितस्थु
र्जनासः। पृथिवीं मातरं महीम्। अन्तरिक्षमुपब्रुवे। बृहतीमूतये दिवम्।
विश्वं बिभर्ति पृथिवी। (58) अन्तरिक्षं विपप्रथे। दुहे द्यौर्बृहती पयः।
न ता नशन्ति न दभाति तस्करः। नैना आमित्रो व्यथिरादधर्षति। देवागंश्च
याभिर्यजते ददाति च। ज्योगित्ताभिस्सचते गोपतिस्सह। न ता अर्वा रेणु
ककाटो अश्नुते। न संस्कृतत्रमुपयन्ति ता अभि। उरुगायमभयं तस्य
ता अनु। गावो मर्त्यस्य विचरन्ति यज्वनः। (59) रात्री व्यख्यदायती। पुरु
त्रा देव्यक्षभिः। विश्वा अधि श्रियोऽधित। उप ते गा इवाकरम्। वृणीष्व
दुहितर्दिवः। रात्री स्तोमं न जिग्युषी। देवीं वाचमजनयन्त देवाः। तां विश्वरू
पाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना। धेनुर्वागस्मानुप सुष्टुतैतु।
(60) यद्वाग्वदन्त्यविचेतनानि। राष्ट्री देवानां निषसाद मन्द्रा। चतस्र ऊर्जं
दुदुहे पयागंसि। क्वस्विदस्याः परमं जगाम। गौरीर्मिमाय सलिलानि तक्षती।
एकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी। सहस्राक्षरा परमे

P.No.

व्योमन्। तस्याग्ं समुद्रा अधि विक्षरन्ति। तेन जीवन्ति प्रदिशश्चतस्रः।
(61) ततः क्षरत्यक्षरम्। तद्विश्वमुपजीवति। इन्द्रा सूरा जनयन्विश्व
कर्मा। मरुत्वाग्ं अस्तु गणवान्सजातवान्। अस्य स्नुषा श्वशुरस्य
प्रशिष्टिम्। सपत्ना वाचं मनसा उपासताम्। इन्द्रस्सूरो अतरद्रजाग्ं
सि। स्नुषा सपत्ना श्वशुरोयमस्तु। अयग्ं शत्रूञ्जयतु जर्हृषाणः।
अयं वाजं जयतु वाजसातौ। अग्निः क्षत्रभृदनिभृष्टमोजाः। सह
स्रियो दीप्यतामप्रयुच्छन्। विभ्राजमानस्समिधान उग्रः। आन्त
रिक्षमरुहदगन्द्याम्। (62) 6

वृषास्यग्ंशुर्वृषभाय गृह्यसे। वृषायमुग्रो नृचक्षसे। दिव्यः कर्मण्यो
हितो बृहन्नाम। वृषभस्य या ककुत्। विषूवान् विष्णो भवतु। अयं
यो मामको वृषा। अथो इन्द्र इव देवेभ्यः। विब्रवीतु जनेभ्यः। आयु
ष्मन्तं वर्चस्वन्तम्। अथो अधिपतिं विशाम्। (63) अस्याः पृथि
व्या अध्यक्षाम्। इममिन्द्र वृषभं कृणु। यस्सुशृङ्गस्सुवृषभः। क
ल्याणो द्रोण आहितः। कार्षीवलप्रगाणेन। वृषभेण यजामहे। वृष
भेण यजमानाः। अक्रूरेणेव सर्पिषा। मृधश्च सर्वा इन्द्रेण। पृतनाश्च
जयामसि। (64) यस्यायं वृषभो हविः। इन्द्राय परिणीयते। जयाति
शत्रुमायन्तम्। अथो हन्ति पृतन्यतः। नृणा मह प्रणीरसत्। अग्रा

P.No.

द्युम्निन्द्रतामसत् । इन्द्र शुष्मन्तनुवामेरयस्व । नीचा विश्वा अभितिष्ठाभिमातीः ।
निश्शृणीह्याबाधं यो नो अस्ति । उरुं नो लोकं कृणुहि जीरदानो । (65) प्रेह्यभि
प्रेहि प्रभरा सहस्व । मा विवेनो विश्शृणुष्वा जनेषु । उदीडितो वृषभ तिष्ठ
शुष्मैः । इन्द्र शत्रून्पुरो अस्माकं युध्य । अग्ने जेता त्वं जय । शत्रून्त्सहस ओजसा
विशत्रून् विमृधो नुदा । तं ते स्तोमं तुविजात विप्रः । रथं न धीरः स्वपा अत
क्षम् । यदीदग्ने प्रति त्वं देव हर्याः । (66) सुवर्वतीरप एना जयेम । यो धृतना
भिमातिः । इन्द्र जैत्राय जज्ञिषे । स नस्संकासु पारय । पृतनासाह्येषु च ।
इन्द्रो जिगाय पृथिवीम् । अन्तरिक्षग्ं सुवर्महत् । वृत्रहा पुरुचेतनः । इन्द्रो
जिगाय सहसा सहाग्ंसि । इन्द्रो जिगाय पृतनानि विश्वा । (67) इन्द्रो जातो
विपुरो रुरोज । स नः परस्पा वरिवः कृणोतु । अयं क्रतुरगृभीतः । विश्वजि
दुद्भिदित्सोमः । ऋषिर्विप्रः काव्येन । वायुरग्रेगा यज्ञप्रीः । साकं गन्मनसा य
ज्ञम् । शिवो नियुद्भिश्शिवाभिः । वायो शुक्रो अयामि ते । मध्वो अग्रं दिविष्टिषु ।
(68) आयाहि सोमपीतये । स्वारुहो देव नियुत्वता । इममिन्द्र वर्धय
क्षत्रियाणाम् । अयं विशां विश्पतिरस्तु राजा । अस्मा इन्द्र महि वर्चाग्ंसि
धेहि । अवर्चसं कृणुहि शत्रुमस्य । इममाभज ग्रामे अश्वेषु गोषु । निरमुं
भज यो मित्रो अस्य । वर्ष्मन्क्षत्रस्य ककुभिश्श्रयस्व । ततो न उग्रो विभजा
वसूनि । (69) अस्मे द्यावापृथिवी भूरि वामम् । संदुहाथां घर्मदुघेव धेनुः ।
अयग्ं राजा प्रिय इन्द्रस्य भूयात् । प्रियो गवामोषधीनामुतापाम् ।

P.No.

युनज्मि त उत्तरावन्तमिन्द्रम्। येन जयासि न परा जयासै। सत्वाकरेक
वृषभग्ं स्वानाम्। अथो राजन्नुत्तमं मानवानाम्। उत्तरस्त्वमधरे
ते सपत्नाः। एकवृष इन्द्रसखा जिगीवान्। (70) विश्वा आशाः पृतनाः
स्संजयञ्जयन्। अभितिष्ठ शत्रूयतस्सहस्व। तुभ्यं भरन्ति क्षितयो यवि
ष्ठ। बलिमग्ने अन्तित ओत दूरात्। आ भन्दिष्ठस्य सुमतिं चिकिद्धि।
बृहत्ते अग्ने महि शर्म भद्रम्। यो देह्यो अनमयद्वधस्नैः। यो अर्यपत्नी
रुषसश्चकार। स निरुध्या नहुषो यह्वो अग्निः। विशश्चक्रे बलिहृतस्स
होभिः। (71) प्र सद्यो अग्ने अत्येष्यन्यान्। आविर्यस्मै चारुतरो
बभूथ। ईडेन्यो वपुष्यो विभावा। प्रियो विशामतिथिर्मानुषीणाम्।
ब्रह्म ज्येष्ठा वीर्या संभृतानि। ब्रह्माग्रे ज्येष्ठं दिवमाततान। ऋतस्य ब्रह्म
प्रथमोत जज्ञे। तेनार्हति ब्रह्मणा स्पर्धितुं कः। ब्रह्म स्रुचो घृतवतीः। ब्रह्म
णा स्वरवो मिताः। (72) ब्रह्म यज्ञस्य तन्तवः। ऋत्विजो ये हविष्कृतः।
शृंगाणीवेच्छृंगिणाग्ं संददृश्रिरे। चषालवन्तस्स्वरवः पृथिव्याम्।
ते देवासस्स्वरवस्तस्थिवाग्ंसः। नमस्सखिभ्यस्सन्नान्मावगात। अभि
भूरग्निरतरद्रजाग्ंसि। स्पृधो विहत्य पृतना अभिश्रीः। जुषाणो म आहुतिं
मामहिष्ट। हत्वा सपत्नान्वरिवस्करं नः। ईशानं त्वा भुवनानामभिश्रियम्।
स्तौम्यग्न उरुकृतग्ं सुवीरम्। हविर्जुषाणस्सपत्नाग्ं अभिभूरसि। जहि
शत्रूग्ंरप मृधो नुदस्व। (73) 7

P.No.

सप्रत्नवन्नवीयसा । अग्ने द्युम्नेन संयता । बृहत्ततन्थ भानुना । नवं
नु स्तोममग्नये । दिवश्श्येनाय जीजनम् । वसोः कुविद्वनाति नः । स्वारु
हा यस्य श्रियो दृशे । रयिर्वीरवतो यथा । अग्ने यज्ञस्य चेततः । अदा
भ्यः पुर एता । (74) अग्निर्विशां मानुषीणाम् । तूर्णी रथस्सदा न
वः । नवगं सोमाय वाजिने । आज्यं पयसोजनि । जुष्टगं शुचितमं वसु ।
नवगं सोम जुषस्व नः । पीयूषस्येह तृप्णुहि । यस्ते भाग ऋता
वयम् । नवस्य सोम ते वयम् । आ सुमतिं वृणीमहे । (75) स नो रास्व सह
स्रिणः । नवगं हविर्जुषस्व नः । ऋतुभिस्सोम भूतमम् । तदङ्ग प्रतिहर्य नः
राजन्त्सोम स्वस्तये । नवगं स्तोमं नवगं हविः । इन्द्राग्निभ्यां निवेदय ।
तज्जुषेतागं सचेतसा । शुचिं नु स्तोमं नवजातमद्य । इन्द्राग्नी वृत्रहणा जुषे
थाम् । (76) उभा हि वागं सुहवा जोहवीमि । ता वाजगं सद्य उशते धेष्ठा । अग्नि
रिन्द्रो नवस्य नः । अस्य हव्यस्य तृप्यताम् । इह देवौ सहस्रिणौ । यज्ञं न
आ हि गच्छताम् । वसुमन्तगं सुवर्विदम् । अस्य हव्यस्य तृप्यताम् । अग्नि
रिन्द्रो नवस्य नः । विश्वान्देवागं स्तर्पयत । (77) हविषोस्य नवस्य
नः । सुवर्विदो हि जज्ञिरे । इदं बर्हिस्सुष्टरीमा नवेन । अयं यज्ञो यजमा
नस्य भागः । अयं बभूव भुवनस्य गर्भः । विश्वे देवा इदमद्यागमि
ष्ठाः । इमे नु द्यावा पृथिवी समीची । तन्वाने यज्ञं पुरुपेशसं धिया ।
आस्मै पृणीतां भुवनानि विश्वा । प्रजां पुष्टिममृतं नवेन । (78)

P.No.

इमे धेनू अमृतं ये दुहाते। पयस्वत्युत्तरा मेतु पुष्टिः। इमं यज्ञं जुष
माणे नवेन। समीची द्यावापृथिवी घृताची। यविष्ठो हव्यवाहनः।
चित्रभानुर्घृतासुतिः। नवजातो विरोचसे। अग्ने तत्ते महित्वनम्।
त्वमग्ने देवताभ्यः। भागे देवान मीयसे। (79) स एना विद्वान्य
क्ष्यसि। नवग्ंं स्तोमं जुषस्व नः। अग्निः प्रथमः प्राश्नातु। स हि
वेद यथा हविः। शिवा अस्मभ्यमोषधीः। कृणोतु विश्वचर्षणिः।
भद्रान्नश्श्रेयस्समनैष्ट देवाः। त्वयावसेन समशीमहि त्वा। स नो
मयोभूः पितो आविशस्व। शं तोकाय तनुवे स्योनः। एतमु त्यं
मधुना संयुतं यवम्। सरस्वत्या अधि मनावचर्कृषुः। इन्द्र
आसीत्सीरपतिश्शतक्रतुः। कीनाशा आसन्मरुतस्सुदानवः।

(80) 8

इति द्वितीयाष्टके चतुर्थः प्रश्नः

P.No.

द्वितीयाष्टके पञ्चमः प्रश्नः

ओम्। प्राणो रक्षति विश्वमेजत्। इर्यो भूत्वा बहुधा बहूनि। स इत्सर्वं
व्यानशे। यो देवो देवेषु विभूरन्तः। आवृदूदात्क्षेत्रियध्वगद्वृषा। तमित्प्राणं
मनसोपशिक्षत। अग्रं देवानामिदमत्तु नो हविः। मनसश्चित्तेदम्। भूतं
भव्यंच गुप्यते। तद्धि देवेष्वग्रियम्। (1) आ न एतु पुरश्चरम्। सह
देवैरिमग्ं हवम्। मनः श्रेयसि श्रेयसि। कर्मन्यज्ञपतिं दधत्। जुषतां मे
वागिदग्ं हविः। विराड्देवी पुरोहिता। हव्यवाडनपायिनी। यया रूपाणि
बहुधा वदन्ति। पेशाग्ंसि देवाः परमे जनित्रे। सा नो विराडनपस्फुरन्ती।
(2) वाग्देवी जुषतामिदग्ं हविः। चक्षुर्देवानां ज्योतिरमृते न्यक्तम्।
अस्य विज्ञानाय बहुधा निधीयते। तस्य सुम्नमशीमहि। मा नो हासी
द्विचक्षणम्। आयुरिन्नः प्रतीर्यताम्। अनन्धाश्चक्षुषा वयम्।
जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम्। श्रोत्रेण भद्रमुत शृण्व
न्ति सत्यम्। श्रोत्रेण वाचं बहुधोद्यमानाम्। श्रोत्रेण मोदश्च महश्च श्रूय
ते। श्रोत्रेण सर्वा दिश आशृणोमि। येन प्राच्या उत दक्षिणा। प्रतीच्यै
दिशः शृण्वन्त्युत्तरात्। तदिच्छ्रोत्रं बहुधोद्यमानम्। अरान्न नेमिः परि
सर्वं बभूव। (3)।

P.No.

उदेहि वाजिन्यो अप्स्वन्तः । इदगं राष्ट्रमाविश सूनृतावत् । यो रोहितो
विश्वमिदं जजान । स नो राष्ट्रेषु सुधितां दधातु । रोहगं रोहगं रोहित आरु
रोह । प्रजाभिर्वृद्धिं जनुषामुपस्थम् । ताभिस्सगं रब्धो अविदत्षडुर्वीः ।
गातुं प्रपश्यन्निह राष्ट्रमाहाः । आहार्षीद्राष्ट्रमिह रोहितः । मृधो व्यास्थदभयं
नो अस्तु । (4) अस्मभ्यं द्यावापृथिवी शक्वरीभिः । राष्ट्रं दुहाथामिह रेव
तीभिः । विममर्श रोहितो विश्वरूपः । समाचक्राणः प्ररुहो रुहश्च । दिवं
गत्वाय महता महिम्ना । वि नो राष्ट्रमुनत्तु पयसा स्वेन । यास्ते विशस्तपसा
संबभूवुः । गायत्रं वत्समनु तास्त आगुः । तास्त्वा विशन्तु महसा स्वेन ।
सं माता पुत्रो अभ्येतु रोहितः । (5) यूयमुग्रा मरुतः पृश्निमातरः । इन्द्रेण
सयुजा प्रमृणीथ शत्रून् । आ वो रोहितो अशृणोदभिद्यवः । त्रिसप्तासो
मरुतस्स्वादुसंमुदः । रोहितो द्यावापृथिवी जजान । तस्मिगं स्तन्तुं परमे
ष्ठीततान । तस्मिञ्छिश्रिये अज एकपात् । अदृगंहद्द्यावापृथिवी बलेन । रोहि
तो द्यावापृथिवी अदृगंहत् । तेन सुवस्स्तभितं तेन नाकः । (6) सो अन्तरिक्षे
रजसो विमानः । तेन देवास्सुवरन्वविन्दन् । सुशेवं त्वा भानवो दीदिवागं सम् ।
समग्रासो जुह्वो जातवेदः । उक्षन्ति त्वा वाजिनमाघृतेन । सगं समग्ने युवसे भोज
नानि । अग्ने शर्ध महते सौभगाय । तव द्युम्नान्युत्तमानि सन्तु । सं जास्प
त्यगं सुयममाकृणुष्व । शत्रूयतामभितिष्ठा महागंसि । (7) 2

P.No.

पुनर्न इन्द्रो मघवा ददातु। धनानि शक्रो धन्यस्सुराधाः। अर्वाचीनं
कृणुतां याचितो मनः। श्रुष्टीनो अस्य हविषो जुषाणः। यानि नो जिन
न्धनानि। जहर्थ शूर मन्युना। इन्द्रानुविन्द नस्तानि। अनेन हविषा
पुनः। इन्द्र आशाभ्यः परि। सर्वाभ्योऽभयं करत्। (8) जेताशत्रून् विच
र्षणिः। आकूत्यै त्वा कामाय त्वा समृधे त्वा। पुरो दधे अमृतत्वाय जीवसे।
आकूतिमस्यावसे। काममस्य समृद्ध्यै। इन्द्रस्य युञ्जते धियः। आकूतिं
देवीं मनसः पुरो दधे। यज्ञस्य माता सुहवा मे अस्तु। यदिच्छामि मनसा
सकामः। विदेयमेनद्धृदये निविष्टम्। (9) सेदग्निरग्नीगं रत्येत्यन्यान्।
यत्र वाजी तनयो वीडुपाणिः। सहस्रपाथा अक्षरा समेति। आशानां त्वाशा
पालेभ्यः। चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यः। विधेम हवि
षा वयम्। विश्वा आशा मधुना सगं सृजामि। अनमीवा आप ओषधयो
भवन्तु। अयं यजमानो मृधो व्यस्यताम्। (10) अगृभीताः पशवस्स
न्तु सर्वे। अग्निस्सोमो वरुणो मित्र इन्द्रः। बृहस्पतिस्सविता यस्स
हस्री। पूषा नो गोभिरवसा सरस्वती। त्वष्टा रूपाणि समनक्तु
यज्ञैः। त्वष्टा रूपाणि दधती सरस्वती। पूषा भगं सविता नो ददातु।
बृहस्पतिर्ददादिन्द्रस्सहस्रम्। मित्रो दाता वरुणस्सोमो अग्निः।

(11) 3

P.No.

आनो भर भगमिन्द्र द्युमन्तम्। नि ते देष्णस्य धीमहि प्ररेके। उर्व इव
पप्रथे कामो अस्मे। तमा पृणा वसुपते वसूनाम्। इमं कामं मन्दया
गोभिरश्वैः। चन्द्रवता राधसा पप्रथश्च। स्वर्यवो मतिभिस्तुभ्यं
विप्राः। इन्द्राय वाहः कुशिकासो अक्रन्। इन्द्रस्य नु वीर्याणि प्रवोचम्।
यानि चकार प्रथमानि वज्री। (12) अहन्नहिमन्वपस्ततर्द। प्रवक्षणा
अभिनत्पर्वतानाम्। अहन्नहिं पर्वते शिश्रियाणम्। त्वष्टास्मै वज्रं
स्वर्यं ततक्ष। वाश्रा इव धेनवः स्यन्दमानाः। अञ्जः समुद्रमवजग्मुरापः। वृषायमाणोऽवृणीत
सोमम्। त्रिकद्रुकेष्वपिबत्सुतस्य। आ सायकं मघवादत्त वज्रम्।
अहन्नेनं प्रथमजामहीनाम्। (13) यदिन्द्राहन्प्रथमजामहीनाम्।
आन्मायिनाममिनाः प्रोत मायाः। आत्सूर्यं जनयन्द्यामुषासम्। तादीत्ना
शत्रून्न किला विवित्से। अहन्वृत्रं वृत्रतरं व्यंसम्। इन्द्रो वज्रेण महता
वधेन। स्कन्धांसीव कुलिशेना विवृक्णा। अहिः शयत उपपृक्पृथि
व्याम्। अयोद्धेव दुर्मद आ हि जुह्वे। महावीरं तुविबाधमृजीषम्। (14)
नातारीरस्य समृतिं वधानाम्। सं रुजानाः पिपिष इन्द्रशत्रुः। विश्वो
विहाया अरतिः। वसुर्दधे हस्ते दक्षिणे। तरणिर्न शिश्रथत्। श्रवस्य
या न शिश्रथत्। विश्वस्मा इदिषुध्यसे। देवत्रा हव्यमूहिषे। विश्वस्मा इत्सु
कृते वारमृण्वति। अग्निर्द्वारा व्यृण्वति। (15) उदु ज्जिह्वानो अभि काम
मीरयन्। प्रपृञ्चन्विश्वा भुवनानि पूर्वथा। आ केतुना सुषमिद्धो यजिष्ठः।

P.No.

कामं नो अग्ने अभि हर्य दिग्भ्यः। जुषाणो हव्यममृतेषु दूढ्यः। आ नो
रयिं बहुलां गोमतीमिषम्। निधेहि यक्षदमृतेषु भूषन्। अश्विना यज्ञ
मागतम्। दाशुषः पुरुदगंससा। पूषा रक्षतु नो रयिम्। (16) इमं यज्ञ
मश्विना वर्धयन्ता। इमौ रयिं यजमानाय धत्ताम्। इमौ पशून्रक्षतां
विश्वतो नः। पूषा नः पातु सदमप्रयुच्छन्। प्र ते महे सरस्वति। सुभगे
वाजिनीवति। सत्यवाचे भरे मतिम्। इदं ते हव्यं घृतवत्सरस्वति। सत्य
वाचे प्रभरेमा हवीगंषि। इमानि ते दुरिता सौभगानि। तेभिर्वयगं
सुभगासः स्याम। (17) 4

यज्ञो रायो यज्ञ ईशे वसूनाम्। यज्ञस्सस्यानामुत सुक्षितीनाम्। यज्ञ इष्टः
पूर्वचित्तिं दधातु। यज्ञो ब्रह्मण्वागं अप्येतु देवान्। अयं यज्ञो वर्धतां गोभिरश्वैः।
इयं वेदिस्स्वपत्या सुवीरा। इदं बर्हिरति बर्हीगंष्यन्या। इमं यज्ञं विश्वे अवन्तु
देवाः। भग एव भगवागं अस्तु देवाः। तेन वयं भगवन्तस्स्याम। (18)
तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुर एता भवेह। भग प्रणेतर्भग
सत्यराधः। भगेमां धियमुदवद्दन्नः। भग प्र णो जनय गोभिरश्वैः।
भग प्र नृभिर्नृवन्तस्स्याम। शश्वतीस्समा उपयन्ति लोकाः। शश्वतीस्समा
उपयन्त्यापः। इष्टं पूर्तगं शश्वतीनागं समानागं शाश्वतेन। हविषेष्ट्वानन्तं
लोकं परमारुरोह। (19) इयमेव सा या प्रथमा व्यौच्छत्। सा रूपाणि

P.No.

कुरुते पंच देवी। द्वे स्वसारौ वयतस्तन्त्रमेतत्। सनातनं विततं षण्म
यूखम्। अवान्यागं स्तन्तून्किरतो धत्तो अन्यान्। नाव पृज्याते न गमाते
अन्तम्। आवो यन्तूदवाहासो अद्या वृष्टिं ये विश्वे मरुतो जुनन्ति। अयं यो
अग्निर्मरुतस्समिद्धः। एतं जुषध्वं कवयो युवानः। (२०) धारावरा
मरुतो धृष्णुवोजसः। मृगान भीमास्तविषेभिरूर्मिभिः। अग्नयो न
शुशुचाना ऋजीषिणः। भृमिन्धमन्त उपगा अवृण्वत। विचक्रमे ति
दैवः। आवेधसं नीलपृष्ठं बृहन्तम्। बृहस्पतिगं सदने सादयध्वम्।
सादद्योनिं दम आदीदिवागंसम्। हिरण्यवर्णमरुषगं सपेम। स हि
शुचिश्शतपत्रस्स शुन्ध्यूः। (२१) हिरण्यवाशीरिषिरस्सुवर्षाः। बृह
स्पतिस्स स्वावेश ऋष्वाः। पूरुसखिभ्य आसुतिं करिष्ठः। पूषगं स्तव
व्रते वयम्। नरिष्येम कदाचन। स्तोतारस्त इह स्मसि। यास्ते पूषन्नावो अ
न्तस्समुद्रे। हिरण्ययीरन्तरिक्षे चरन्ति। याभिर्यासि दूत्यागं सूर्यस्य। कामेन
कृतश्श्रव इच्छमानः। (२२) अरण्यान्यरण्यान्यसौ। या प्रेव नश्यसि। कथा
ग्रामं न पृच्छसि। न त्वा भीरिव विन्दती ३। वृषारवाय वदते। यदुपावति चिच्चिकः।
आघाटिभिरिव धावयन्। अरण्यानिर्महीयते। उत गाव इवादन्। उतो
वेश्मेव दृश्यते। (२३) उतो अरण्यानिस्सायम्। शकटीरिव सर्जति।
गामङ्गैष आह्वयति। दार्वङ्गैष उपावधीत्। वसन्नरण्यान्यागं सायम्।
अक्रुक्षदिति मन्यते। न वा अरण्यानिर्हन्ति। अन्यश्चेन्नाभिगच्छति।

P.No.

स्वादोः फलस्य जग्ध्वा। यत्कामं निपद्यते। आञ्जनगन्धीगं सुरभिम्।
बह्वन्नामकृषीवलाम्। प्राहं मृगाणां मातरम्। अरण्यानीमशगंसिषम्।
(24) 5
वार्त्रहत्याय शवसे। पृतनासाह्याय च। इन्द्र त्वावर्तयामसि। सुब्रह्मा
णं वीरवन्तं बृहन्तम्। उरुं गभीरं पृथुबुध्नमिन्द्र। श्रुतर्षिमुग्रमभिमा
तिषाहम्। अस्मभ्यं चित्रं वृषणगं रयिं दाः। क्षेत्रियै त्वा निर्ऋत्यै त्वा।
द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणे त्वा करोमि। (25)
शिवे ते द्यावापृथिवी उभे इमे। शं ते अग्निस्सहाद्भिरस्तु। शं द्यावापृथिवी
सहौषधीभिः। शमन्तरिक्षगं सह वातेन ते। शं ते चतस्रः प्रदिशो भवन्तु।
या दैवीश्चतस्रः प्रदिशः। वातपत्नीरभि सूर्यो विचष्टे। तासां त्वा जरस
आदधामि। प्र यक्ष्म एतु निर्ऋतिं पराचैः। अमोचि यक्ष्माद्दुरितादवर्त्यै।
(26) द्रुहः पाशान्निर्ऋत्यै चोदमोचि। अहा अवर्तिमविदत्स्योनम्।
अप्यभूद्भद्रे सुकृतस्य लोके। सूर्यमृतं तमसो ग्राह्या यत्। देवा अमुञ्च
न्नसृजन्व्येनसः। एवमहमिमं क्षेत्रियाज्जामिशगंसात्। द्रुहो मुञ्चामि वरुणस्य
पाशात्। बृहस्पते युवमिन्द्रश्च वस्वः। दिव्यस्येशाथे उत पार्थिवस्य। धत्तगं
रयिगंस्तुवते कीरये चित्। (27) यूयं पात स्वस्तिभिस्सदा नः। देवायुध
मिन्द्रमाजोहुवानाः। विश्वावृधमभि ये रक्षमाणाः। येन हता दीर्घमध्वान
मायन्। अनन्तमर्थमनिवर्त्स्यमानाः। यत्ते सुजाते हिमवत्सु भेषजम्।

P.No.

मयोभूश्शन्तमा यद्बृदोसि। ततो नो देहि जीवसे। अदो गिरिभ्यो अधियत्प्र
धावसि। सगं शोभमाना कन्येव शुभ्रे। (२८) तां त्वा मुञ्जा हविषा वर्धयन्ति।
सा नस्सीबले रयिमाभाजयेह। पूर्वं देवा अपरेणानुपश्यञ्जन्मभिः। जन्मा
न्यवरैः पराणि। वेदानि देवा अयमस्मीति माम्। अहगं हित्वा शरीरं जरसः
परस्तात्। प्राणापानौ चक्षुश्श्रोत्रम्। वाचं मनसि संभृताम्। हित्वा शरीरं
जरसः परस्तात्। आभूतिं भूतिं वयमश्नवामहै। इमा एव ता उषसो याः
प्रथमा व्यौच्छन्। ता देव्यः कुर्वते पञ्चरूपा। शश्वतीर्नावपृज्यन्ति। न गम
न्त्यन्तम्। (२९) 6

वसूनां त्वाधीतेन। रुद्राणामूर्म्या। आदित्यानां तेजसा। विश्वेषां देवानां
क्रतुना। मरुतामेम्ना जुहोमि स्वाहा। अभिभूतिरहमागमम्। इन्द्रसखा
स्वायुधः। आस्वाशासु दुष्षहः। इदं वर्चो अग्निना दत्तमागात्। यशो भर्ग
स्सह ओजो बलं च। (30) दीर्घायुत्वाय शतशारदाय। प्रतिगृभ्णामि महते
वीर्याय। आयुरसि विश्वायुरसि। सर्वायुरसि सर्वमायुरसि। सर्वं म आयु
र्भूयात्। सर्वमायुर्गेषम्। भूर्भुवस्सुवः। अग्निर्धर्मणान्नादः। मृत्यु
र्धर्मणान्नपतिः। ब्रह्मन्क्षत्रगं स्वाहा। (31) प्रजापतिः प्रणेता। बृह
स्पतिः पुर एता। यमः पन्था। चन्द्रमाः पुनरसुस्स्वाहा। अग्निरन्ना
दोन्नपतिः। अन्नाद्यमस्मिन् यज्ञे यजमानाय ददातु स्वाहा। सोमो राजा

P.No.

राजपतिः। राज्यमस्मिन् यज्ञो यजमानाय ददातु स्वाहा। वरुणस्सम्राट्
सम्राट्पतिः। साम्राज्यमस्मिन् यज्ञो यजमानाय ददातु स्वाहा। (32)
मित्रः क्षत्रं क्षत्रपतिः। क्षत्रमस्मिन् यज्ञे यजमानाय ददातु स्वाहा। इन्द्रो
बलं बलपतिः। बलमस्मिन् यज्ञो यजमानाय ददातु स्वाहा। बृहस्पति
र्ब्रह्म ब्रह्मपतिः। ब्रह्मास्मिन् यज्ञो यजमानाय ददातु स्वाहा। सविता
राष्ट्रंराष्ट्रपतिः। राष्ट्रमस्मिन् यज्ञो यजमानाय ददातु स्वाहा। पूषा विशां
विट्पतिः। विशमस्मिन् यज्ञो यजमानाय ददातु स्वाहा। सरस्वती पुष्टिः पुष्टि
पत्नी। पुष्टिमस्मिन् यज्ञो यजमानाय ददातु स्वाहा। त्वष्टा पशूनां मिथुनानाग्ं
रूपकृद्रूपपतिः। रूपेणास्मिन् यज्ञे यजमानाय पशून्ददातु स्वाहा। (33) 7

सईं पाहि य ऋजीषी तरुत्रः। यश्शिप्रवान्वृषभो यो मतीनाम्। यो गोत्र
भिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राग्ं अभितृन्धि वाजान्। आ ते शुष्मो
वृषभ एतु पश्चात्। ओत्तरादधरागा पुरस्तात्। आ विश्वतो अभि स
मेत्वर्वाङ्। इन्द्र द्युम्नग्ं सुवर्वद्धेह्यस्मे। प्रो ष्वस्मै पुरोरथम्। इन्द्राय
शूषमर्चत। (34) अभीके चिदु लोककृत्। सङ्गे समत्सु वृत्रहा।
अस्माकं बोधि चोदिता। नभन्तामन्यकेषाम्। ज्याका अधि धन्वसु।
इन्द्रं वयग्ं शुनासीरम्। अस्मिन् यज्ञे हवामहे। आ वाजैरुपनो गमत्।
इन्द्राय शुनासीराय। स्रुचा जुहुत नो हविः। (35) जुषतां प्रति मेधिरः।

P.No.

प्र हव्यानि घृतवन्त्यस्मै। हर्यश्वाय भरता सजोषाः। इन्द्रर्तुभिर्ब्रह्मणा
वावृधानः। शुनासीरी हविरिदं जुषस्व। वयस्सुपर्णा उपसेदुरिन्द्रम्।
प्रियमेधा ऋषयो नाधमानाः। अपध्वान्तमूर्णुहि पूर्धि चक्षुः। मुमुग्ध्य
स्मान्निधयेव बद्धान्। बृहदिन्द्राय गायत। (36) मरुतो वृत्रहन्तमम्।
येन ज्योतिरजनयन्नृतावृधः। देवं देवाय जागृवि। का मिहैकाः क इमे पतंगाः
मान्थालाः कुलि परिमापतन्ति। अनावृतैनान्प्रधमन्तु देवाः। सौपर्णं
चक्षुस्तनुवा विदेय। रावा वन्दस्व वरुणं बृहन्तमानमस्याधीरममृतस्य
गोपाम्। स नः शर्म त्रिवरूथं वियंसत्। (37) यूयं पात स्वस्तिभि
स्सदा नः। नाके सुपर्णमुप यत्पतन्तम्। हृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्षं वरुणस्य दूतम्। यमस्य योनौ शकुनं भुरण्युम्। शंनो
देवीरभिष्टये। आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः। ईशाना वार्या
णाम्। क्षयन्तीश्चर्षणीनाम्। (38) अपो याचामि भेषजम्। अप्सु
मे सोमो अब्रवीत्। अन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवम्।
आपश्च विश्वभेषजीः। यदप्सु ते सरस्वति। गोष्वश्वेषु यन्मधु। तेन
मे वाजिनीवति। मुखमंग्धि सरस्वति। या सरस्वती वैशंभलया। (39)
तस्यां मे रास्व। तस्यास्ते भक्षीय। तस्यास्ते भूयिष्ठभाजो भूयास्म।
अहं त्वदस्मि मदसि त्वमेतत्। ममासि योनिस्तव योनिरस्मि। ममैव
सन्वह हव्यान्यग्ने। पुत्रः पित्रे लोककृज्जातवेदः। इहैव सन्तत्र सन्तं

P.No.

त्वाऽग्ने। प्राणेन वाचा मनसा बिभर्मि। तिरो मासन्त मायुर्मा प्रहा
सीत्। (40) ज्योतिषा त्वा वैश्वानरेणोपतिष्ठे। अयं ते योनिर्
ऋत्वियः। यतो जातो अरोचथाः। तं जानन्नग्न आरोह। अथा नो
वर्धया रयिम्। या ते अग्ने यज्ञिया तनूस्तये ह्यारोहात्मात्मानम्।
अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद
स्वां योनिम्। जातवेदो भुव आजायमानस्सक्षय एहि। उपावरोह
जातवेदः पुनस्त्वम्। (41) देवेभ्यो हव्यं वह नः प्रजानन्।
आयुः प्रजाग्ं रयिमस्मासु धेहि। अजस्रो दीदिहि नो दुरोणे।
तमिन्द्रं जोहवीमि मघवानमुग्रम्। सत्रा दधानमप्रतिष्कुतग्ं
शवाग्ंसि। मग्ंहिष्ठो गीर्भिराच यज्ञियो ववर्तत्। राये नो विश्वा सु
पथा कृणोतु वज्री। त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्। सोममम
पिबद्विष्णुना सुतं यथावशत्। स ईं ममाद महि कर्म कर्तवे महा
मुरुम्। (42) सैनग्ं सश्चद्देवो देवस्सत्यमिन्दुग्ं सत्य इन्द्रः।
विदद्यती सरमा रुग्णमद्रेः। महि पाथः पूर्व्यग्ं सध्रियक्कः। अग्रं
नयत्सुपद्यक्षराणाम्। अच्छा रवं प्रथमा जानती गात्। विदद्गव्यग्ं
सरमा दृढमूर्वम्। येना नुकं मानुषी भोजते विट्। आ ये विश्वा स्वपत्या
निचक्रुः। कृण्वाना सो अमृतत्वाय गातुम्। त्वं नृभिर्नृपते देवहूतौ।
(43) भूरीणि वृत्वा हर्यश्व हग्ंसि। त्वं निदस्युं चुमुरिम्।

~~भूरीणि कृत्वा हर्यश्व हर्यक्षि।~~

धुनिं चास्वापयो दभीतये सुहन्तु। एवा पाहि प्रत्नथा मन्दतु त्वा।

~~श्रुधि~~ श्रुधि ब्रह्म वावृधस्वोत गीर्भिः। आविस्सूर्यं कृणुहि पीपि

हीषः। जहि शत्रूग्ं रभि गा इन्द्र तृन्धि। अग्ने बाधस्व विमृधो नुदस्व।

अपामीवा अप रक्षाग्ंसि सेध। अस्मात्समुद्राद्बृहतो दिवो नः (44)

अपां भूमानमुप न स्सृजेह। यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आत्वा।

वसूनि पुरुधा विशन्तु। दीर्घमायुर्यजमानाय कृण्वन्। अधामृतेन

जरितारमङ्‍ग्धि। इन्द्रश्शुनावद्वितनोति सीरम्। संवत्सरस्य प्रति

माणमेतत्। अर्कस्य ज्योतिस्तदिदास ज्येष्ठम्। संवत्सरग्ं शुन

वत्सीरमेतत्। इन्द्रस्य राधः प्रयतं पुरुत्मना। तदर्करूपं विमि

मानमेति। द्वादशारे प्रतितिष्ठतीद्वृषा। अश्वायन्तो गव्यन्तो वाज-

-यन्तः। हवामहे त्वोपगन्तवा उ। आभूषन्तस्त्वा सुमतौ नवायामावय

मिन्द्र त्वा शुनग्ं हुवेम। (45) 8

इति द्वितीयाष्टके पंचमः प्रश्नः